॥ श्रीः ॥

॥ उद्गातृदशाननम् ॥

॥ नाटकम् ॥

UDGĀTṚDAŚĀNANAM

A DRÁMA IN SEVEN ACTS

BY

V. Mahalinga Sastri, M. A., B. L.

कविसार्वभौम-कविशेखर
श्री. महालिङ्गशास्त्रिणा
विरचितम्।

300 Re-print Copies only.

साहित्यचन्द्रशाला
तिरुवालङ्गाडु, तञ्जापुर डिस्ट्रिक्ट्

SAHITYA CANDRASALA,
TIRUVALANGADU B. O., Tanjore Dist.,
MADRAS STATE.

October, 1958

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Price Rs. Four

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

॥ उद्गातृदशाननम् ॥

॥ नाटकम् ॥

UDGĀTṚDAŚĀNANAM

A DRAMA IN SEVEN ACTS

BY

V. Mahalinga Sastri, M. A., B. L.

कविसार्वभौम-कविशेखर

श्री. महालिङ्गशास्त्रिणा

विरचितम्।

---

300 Re-print Copies only.

साहित्यचन्द्रशाला

तिरुवालङ्गाडु, तञ्जापुर डिट्रिक्ट्

SAHITYA CANDRASALA,

TIRUVALANGADU B. O., Tanjore Dist.,

MADRAS STATE.

October, 1958

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Copyright

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CONTENTS.

SRIMUKHAM iv
By His Holiness Jagadguru Sri Sankaracharya Swami of the Kanchi Kamakoti Peetam.

FOREWORD v
By His Holiness Sri Swami Sivananda Saraswati of Rishikesh.

AUTHOR'S PREFACE vii

CHARACTERS IN THE PLAY ix

TEXT OF THE PLAY १—६६

INDEX TO METRES USED 1

A NOTE ON THE NEW METRES 2

ERRATA 3

INDEX OF VERSES 6

PRICE LIST OF PUBLICATIONS. 9

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

SRIMUKHAM

BY

His Holiness Jagadguru

Sri SANKARACHARYA SWAMIGAL

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य-
श्रीमच्छङ्करभगवत्पादप्रतिष्ठित-
श्रीकाञ्चीकामकोटिपीठाधिपजगद्गुरु-
श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीपादैः

तिरुवालङ्गाड्ग्रामाभिजनाय शास्त्ररत्नाकर यज्ञस्वामि शास्त्रितनूजाय
श्री महालिङ्गशास्त्रिणे क्रियते नारायणस्मृतिः ।

भवता विरचितमुद्गातृदशाननाभिधानं नाटकमस्मत्सविधे समाहृतम् । एतन्नाटकं रावणस्य दिग्विजयक्रमेण श्रीकैलासाचलचालनमधिकृत्य प्रवृत्तम् अनुगुणरसालङ्कारादिभरितम् अन्ते परमेश्वरस्तुतिसहितं च विराजमानं प्रेक्षकाणां चित्तरञ्जकमीश्वरभक्तिप्रवर्धकं च भूयादित्याशास्महे ।

विजययात्रास्थानम्
मयूरपुरी - चेन्नपट्टणम्
विलम्बि-आश्विन शुद्धसप्तमी

नारायणस्मृतिः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

OM.

FOREWORD

By His Holiness Sri Sivananda Sarasvati of Rishikesh.

I am immensely delighted to see the indefatigable energy and enthusiasm with which Sri Y. Mahalinga Sastriji is enriching Sanskrit literature. Apart from Sanskrit Readers to school children, he wrote many valuable books which adorn many libraries. He is as much proficient in poetry as in prose.

A perusal of his Pratirajasuyam and the present drama convinces us that he is one of the great Sanskrit dramatists of our time. His dramas grip the attention of the readers. Once begun, you will not desire to lay them by till you reach the end. The plots and the episodes are very skilfully woven. The episodes become unforgettable stories to all those who go through these dramas.

We discern many valuable spiritual truths and moral lessons in the pages of this drama. How an arrogant man is humbled and taken into the Divine protection and care, how God transforms the wicked into divine personalities, how the evil side of man is ultimately subdued and conquered by his innate divine nature, how reliance on God is the safe method of winning His grace

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

and blessings–all these noble truths are dexterously brought out by Sri Mahalinga Sastriji. Lasting impressions are made on our minds.

I wish and pray that the Lord may amply reward the noble efforts of Sri Sastriji. May this work of art be widely read by the lovers of Sanskrit and Indian culture. May Lord shower His grace on Sri Sastriji and inspire him to produce many more such valuable and educative works. May He endow Sri Sastriji with sound health, peace, prosperity, bliss and Kaivalya Moksha.

Sivananda Nagar
13—6—58

Swami Sivananda.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

AUTHOR'S PREFACE.

Udgatṛ Daśānanam was the first drama which I attempted to write. I began it about the end of 1927 and wrote the first four Acts by December 1928. Fourteen years elapsed before I took it up again for completing it. The last three Acts were written between January 29th and March 6th of 1943. I had written not less than six dramas in the meantime—Kaundinya Prahasanam in 1928; Pratirajasuyam in 1929; Markata Mardalika in 1937; Śṛingāra-Naradiyam and Ubhaya Rupakam in 1938; Kalipradurbhava in 1939 and Adikavyodaya in 1942. The Fourth Act concludes with Ravana's fall to the foot of Kailasa by the condemnation of Nandi Bhagavan. The opening verses of the Fifth Act refer in a veiled manner to the gap of fourteen years which separated the composition of the first from that of the second part of the drama.

Ravana Gitam, though inspired by this theme and an integral part of the drama, actually belongs to the series of my musical compositions of the Ragamalika type, and its musical settings with Swara chart will be published along with my Sangita Kritis.

His Holiness the Jagadguru of Sri Kanchi Kamakoti Peetam has blessed me with a Srimukham, and His Holiness Swami Sivananda has been gracious enough to adorn this

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

book with a Foreword; my reverent prostrations and adorations to the Gurus.

As usual Sri K. Rajagopala Sastri assisted me in seeing the proofs and has laid me in debt by his disinterested love of service.

My thanks are due to the Editor of the Udyana Patrika, Professor D T. Tatacharya who is continuing to accommodate me in the pages of the Journal, with the classical benevolence of the Rishi, who shared his meagre flour-meal preserved with care for his breaking his long and austere fast, with the famished guest.

It is not surprising that in the endless winter-nights for Sanskrit which is refrigerated with the antarctic temperature in the minus grade, the thawing of hearts has not set in too soon in spite of all the warmth of endeavour which I have carried with me for more than a quarter of of a century. I have taken refuge against the chill-blasts at the sanctum-sanctorum of chillness itself, through locating the action of this play at the loftiest and most holy of the snow-clad peaks of the Himalayas.

Tiruvalangadu.
25—6—58.

V. Mahalinga Sastri

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नाटकपात्राणि (अङ्कक्रमेण) ॥

प्रथमाङ्के— प्रस्तावनायाम्— सूत्रधारः, नटी।
अङ्के— नन्दी ; विनायकः ; भृङ्गिरिटिः ; स्कन्दः।
प्रदोषसन्ध्या, शिवरात्रिः।

द्वितीयाङ्के— शुद्धविष्कम्भे— देवदूतः ; नारदः।
अङ्के— दशाननः ; प्रहस्तः ; विद्युज्जिह्वः ; महोदरः ;
मारीचः ; शुकः ; सारणः ; यक्षः।

तृतीयेऽङ्के— विष्कम्भे— चञ्चला।
अङ्के— दशाननः ; महोदरः ; प्रहस्तः ; विद्युज्जिह्वः ; यक्षः।

चतुर्थेऽङ्के— विष्कम्भे— नारदः ; यक्षः।
अङ्के— दशाननः ; प्रहस्तः ; विद्युज्जिह्वः ; महोदरः ; नन्दी।

पञ्चमेऽङ्के— पुरन्दरः ; वाचस्पतिः ; नन्दी ; भृङ्गिरिटिः।

षष्ठेऽङ्के— महोदरः ; प्रहस्तः ; विद्युज्जिह्वः ; शुकः ; सारणः ; मारीचः ;
सुमाली।

सप्तमेऽङ्के— शुद्धविष्कम्भे—नारदः ; पुष्पदन्तः ; उपमन्युः ; मार्कण्डेयः ;
दुर्वासाः ; चण्डीशः।
अङ्के— दशाननः ; सुमाली ; राक्षसमन्त्रिणः ; नन्दी ;
परमेश्वरः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

मरकतवल्लीसमेतश्रीमार्गसहायस्वामिने नमः ।

॥ उद्गातृदशाननम् ॥

नाम

॥ नाटकम् ॥

श्री महालिङ्गकविप्रणीतम् ।

नमो दिक्पालकोटीरहीरनीराजिताङ्घ्रये ।
शम्भवे जगदारम्भस्थितिसंस्थितिहेतवे ॥ १ ॥

यक्षो रक्षो दानवो मानवो वा
स्यादासीद्वा योऽपराधी विरोधी ।
तस्याकस्मात् क्वापि बुद्धौ सशुद्धौ
युष्मान् सद्यः सर्वदः पातु शर्वः ॥ २ ॥

नान्द्यन्ते

सूत्रधारः—

नन्दिकरकलितडमरुक-
लयनिरपेक्षोद्धमत्पदाब्जाय ।
उन्मत्तताण्डवाडम्बराय
सन्ध्यानटाय नमः ॥ ३ ॥

(इति पुष्पाञ्जलिं विकीर्य किञ्चिदन्तरं गत्वा पुरोऽवलोक्य सहर्षपारवश्यम् ।)

अर्णवोऽर्णव इत्येवमलं स्तुत्वा जडाशयम् ।
निर्णयान्तर्हितक्षोभं संस्तुमः संसदर्णवम् ॥ ४ ॥

(नेपथ्याभिमुखमवलोक्य) आर्ये, किं न त्वरसे ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नेपथ्ये,

अये, मुञ्च, मुञ्च दुकूलाञ्चलम्। आर्यपुत्र आह्वयति।

सूत्रधारः— हा धिक्। कस्तावत्ते गत्युपरोधं करोति।

(दृष्ट्वा सहासम्) अहो बालकस्य दुश्चेष्टितम्।

व्यालम्बमानः सिचयाञ्चलेन पन्द्यां पुरो विन्यितपादचारः।
आयासयत्यानतपूर्वकायामम्बां रुदन्नर्धविमिश्रहासः॥ ५॥

(पुनः स्मृत्वा) अहो कार्यातिपातः। एष हुंकृतेनैनं निवारयामि।

नेपथ्ये

अयि वत्स, पश्य, पश्य। पिता त्वां निर्वर्ण्य निर्भर्त्सयते। अपेहि, अपेहि यावन्नोपैष्यति।

सूत्रधारः— (सहासम्) कथं मद्भ्रुकुटिं दृष्ट्वा अपक्रान्त एव।

प्रविश्य

नटी— (सलज्जास्मितं सविभ्रमायासं निःश्वसती) जयत्वार्यपुत्रः। बालस्यापि पुंसोऽस्य पुरोऽहमबलैव नूनं येन क्षणमात्रेणास्मि विश्रथिताङ्गयष्टिराक्रोशमात्रशरणा विक्लवीकृता।

सूत्रधारः— (सस्मितम्) यत्सत्यमाकम्पितामिव लतां त्वां संस्थाशून्यामेव पश्यामि। अद्य खलु भवत्याः,

उत्तरलाक्षि स्मेरं स्रंसि मुखं विनतनालमिव पद्मम्।
व्याकीर्णोऽलकभारः साध्वसहर्षावधूतायाः॥ ६॥

नटी— आर्यपुत्र, अलमधिकं मां लज्जापयित्वा। कीदृश उपक्रमः आर्यपुत्रस्य (सस्मितम्) यो मां त्वरया आह्वयत्।

सूत्रधारः— साधु। सम्यक् स्मारिताः स्मः। अद्य खलु श्रीमदप्पय्यदीक्षितवंश्यस्य, श्रीयज्ञेश्वरकविसूनोः श्रीमार्गसहायशर्मणो महालिङ्गकवेः अभिनवेन उद्भातृदशानन नाम्ना सनातनलोकवार्ताबद्धप्रतिशब्दबन्धु-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रेण, उपहितालौकिकसंवित्संस्थानरहस्येन, परमेश्वरकृपाप्रापकेण, रूपकेण सभासदः सभाजयितुमिच्छामि । तदिदमधिकृत्य काशनीकाशच्छविगगनाङ्गणविहरमाणराजहंसं शरत्समयं, सामाजिकाराधनाय प्रस्तूयतां किमपि गीतम् ।

नटी— (तथेति गायति)

तारामौक्तिकहारा
सितपरिचलदभ्रदिव्यसंव्याना ।
उल्लसितचन्द्रवदना
क्रीडति गगनाङ्गणे रजनी ॥ ७ ॥

सूत्रधारः— साधु गीतम् । (पुरो दृष्ट्वा) अथवा 'क्रीडति शैलाङ्गणे गौरी'ति वक्तव्यम् । पश्य, पश्य काञ्चनशरवणमालावलयितस्य विन्दुसरसः परिसरारामे क्रीडासक्तायाः शैलराजतनयायाः दौवारिकधुरां वहन्नेष नन्दी अनभिनन्दनीयभ्रुकुटिरित एवाभिवर्तते । तदावासितोऽपसृत्य अनन्तरकरणीयाय सज्जीभवावः ।

नटी— तथा ।

(उभौ निष्क्रान्तौ)

प्रस्तावना ।

ततः प्रविशति यथा निर्दिष्टो नन्दी, केनचिदन्तरेण पृष्ठतो भृङ्गिरिटिश्च ।

नन्दी— (चिन्तां नाटयन् स्वगतम्)

कलिश्चेदादिदम्पत्योरीदृशोऽपि गृहाश्रमे ।
का कथा मोहमात्सर्यकलुषाणां नृणां भुवि ॥ ८ ॥

भृङ्गिरिटिः— (साशङ्कमुपसर्पन्) भगवतः किमपि गुरुकं चिन्तास्थानमिव पश्यामि । यद्यहं विश्वासभाजनम् ... ...

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नन्दी— भृङ्गिरिटे,

भृङ्गिरिटिः— (सत्वरोपसर्पणम्) भगवन् !

नन्दी— अद्य कलासशिखरे सन्निहत एव भवान् ।

भृङ्गिरिटिः— अथ किम् ।

नन्दी— तत् किमत्र प्रष्टव्यम् । अपि च पश्य, सचराचरं जगदद्य ज्ञातव्यं विजानाति । तथा हि—

निष्पन्दास्तरवः प्रशान्तविहगव्याहारमूकादिशः
सन्त्रस्ताः सरितो नदन्ति न पुरो ग्रावोपरुद्धा अपि ।
सृष्टिश्चित्रमयीव भाति निखिला लीना गणाः कुत्रचि-
द्देवे तिष्ठति योगसंवृतरुषि त्यक्तेऽम्बया रुष्टया ॥ ९ ॥

भृङ्गिरिटिः— कथं रुष्टया त्यक्त इति । अहं तावदज्ञासिषं देवी क्रीडितुं शरवणमागतेति । किं तु प्रागेव मम हृदयकोणे लब्धी कापि शङ्का उदभूत्, देवस्याविनाभूता देवी कथमेकाकिनी विहारभुवमतरतीति ।

नन्दी— नीचैर्भण, नीचैर्भण ।

भृङ्गिरिटिः— भगवन्, तत्किमिदं कालुष्यनिदानं देव्याः ।

नन्दी— किं नावगतो भवताऽद्य विजयाया वृत्तान्तः ।

भृङ्गिरिटिः— आम्, किमप्यसमग्रमवगतम् । सा शप्तेति श्रूयते । कथं वराकी देव्यामपराद्धा ।

नन्दी— न सा देव्या शप्ता ।

भृङ्गिरिटिः— किन्तु ....

नन्दी— ... देवेन । श्रूयतां शुद्धान्तरहस्यम् ।

देव्या सखीप्रणयतोऽनुमतप्रवेशा
तस्थौ कवाटविवरार्पितवामकर्णा ।

(नेपथ्ये कलकलः)

नन्दी— किमिदम् ।

भृङ्गिरिटिः—कथयतु भगवान् । ततस्ततः ।

नन्दी— प्राक्कल्पचित्रचरितश्रवणाद्भुतेन
हन्तेत्युदीर्य विजया विदिता बभूव ॥ १० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(पुनर्नेपथ्ये महान् कलकलः)

नन्दी— कुत एष आरवः ?

भृङ्गिरिटिः— उत्तरतः शैलप्राग्भारादुच्चरति । यक्षेश्वरो विनिर्गच्छतीति मन्ये । अथ संक्षेपतः कीदृश्यद्य तपस्विनी ।

नन्दी— निलीयोपश्रुतवतीति वातशरीरा पिशाची भवेति शप्ता कुत्र परिभ्रमतीति न ज्ञायते ।

भृङ्गिरिटिः—अथ देव्यास्तत्र कीदृशी प्रतिपत्तिः ।

नन्दी— कवाटमूलात् स्वरं श्रुत्वा देवे, 'कोऽत्र' इति पृच्छति, स्वेन कृतं निगूहितुं 'न कोऽपि, न कोऽपि, कथ्यतामग्रे कथा' इति शाठ्येन प्रोत्साहयामास देवम् । शङ्कमानस्तु देवः प्रणिधानेन तत्त्वमध्यगच्छत् ।

भृङ्गिरिटिः— अहो, देव्यप्यन्ततो गत्वा योषिदेव ।

नन्दी— नीचैर्भण, नीचैर्भण ।

भृङ्गिरिटिः— अथ देव्यां किं देवः कुपितः ।

नन्दी— कस्तं वेद । दत्तशापो झटिति संहृतार्धनिमीलितेक्षणो योगासनं बबन्ध । देव्यपि लज्जामानविषादेर्ष्याशबलविकृतचित्ता बहिराकारं किमपि रक्षन्ती ततो निश्चक्राम ।

(नेपथ्ये ससिंहगर्जनं युद्धकलकलः)

नन्दी— (साशङ्कम्) किमु यक्षपुरीं केऽप्यभियोक्तारः प्रविष्टाः ।

भृङ्गिरिटिः— ननु राक्षसैर्भवितव्यम् । श्रूयते खलूद्रिक्तास्तेऽधुना परिभ्रमन्तीति ।

नन्दी— यदि रक्षांस्यारात् सञ्चरन्ति विशेषतो गुप्तिः कार्या कैलासं परितो दशदिशाम् । अहं तावदारक्षकानभितो नियोजयामि । भवान् कुबेरपुर्या वृत्तान्तमवधारयतु (परिक्रामन् स्वगतम्) विशेषतः शरवणोपशल्ये जागरूकैर्भवितव्यम् ।

(इति निष्क्रान्तः)

भृङ्गिरिटिः— (परिक्रामन्) हा धिक् । ईदृगद्य प्रभातम् । न खलु देव्यनुमता विशेषतस्तस्याः प्रियसखीति तत्प्रणयमनुरुरोध देवः । स्थाने देवी कुपिता । अहह, समवायिनोर्धर्मधर्मिणोरिव अचिन्त्यः खल्वनयोः पृथग्भावः । कथमेतद्भविष्यति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(नेपथ्ये पुनर्युद्धकलकलः)

भृङ्गिरिटिः— (श्रुत्वा) अहो तु भोः !

घोराट्टहाससंमिश्रो येन हाहारवो महान् ।
नूनं नासीरनिर्वाही कोऽपि वीरोऽपहस्तितः ॥ ११ ॥

(स्मृत्वा) अथैतस्मिन्नवसरे क्व गतौ वत्सौ ।

(ससंभ्रमं परिक्रामति ।)

नेपथ्ये

आर्य, स्खलति मे पदम् । न शक्नोम्यनुधावितुम् । एहि प्रतिपालय माम् ।

भृङ्गिरिटिः— कथं विनायकस्कन्दौ किमप्युद्विग्नाविव त्वरयोपसर्पतः । दुरारोहो वत्सयोः विसंस्थुलः शैलसंघातः । गत्वा आनयामि वत्सौ । (इति कतिचित् पदानि परिक्रम्य दृष्ट्वा सहर्षम्) एष भ्रातृवत्सलः कुमारं स्कन्धदेश आरोप्य वहन्नागत एव द्वैमातुरः ।

(ततः प्रविशतः यथानिर्दिष्टौ विनायकस्कन्दौ)

स्कन्दः— आर्य, कोऽयं दशमुखो नाम ।

विनायकः— यः पितामहस्य प्रपौत्रः ।

स्कन्दः— अजिह्मं कथयत्वार्यः ।

विनायकः— वक्रतुण्डः कथमजिह्मं भाषते । अथवा श्रृणु । स ब्रह्मणः प्रपौत्रः पुलस्त्यमहर्षेः पौत्रः । विश्रवसः पुत्रः । कुबेरस्य च वैमातुरः कनीयान् भ्राता ।

स्कन्दः— अथ ज्येष्ठं भ्रातरमेवं निपीडयति ; अहो उच्छृङ्खलता ।

विनायकः— एष एव भ्रातृभावस्य नियमः ; एकः शिरसि ताडयति । अन्यः स्कन्धमारोहति ।

स्कन्दः— अपैत्वार्यः । परिहसति माम् ।

(इत्यवारोढुमिच्छति)

विनायकः— मा कुप्य, मा कुप्य ।

स्कन्दः— आर्य, स कथं दशमुखः ।

विनायकः— केचन षण्मुखाः । केचन दशमुखाः । एष च भृङ्गिरिटिः तुरगमुखः सविषाणश्च ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्कन्दः — (हसति)

भृङ्गिरिटिः — भवांस्तु करिमुखः एकदन्तश्च ।

विनायकः — बाढम् ।

भृङ्गिरिटिः—(स्कन्दमुपगृह्य) युवां कुतः। कः कालः स्कन्दमन्विष्यति देवी।

विनायकः— अथ मां न कोऽप्यन्वेषते ।

भृङ्गिरिटिः — (सस्मितम्) सर्वः प्रत्यूहाभिद्रुतसिद्धिः श्रेयस्कामो जनः ।

स्कन्दः— भृङ्गिरिटे, अलकायां राक्षसाः घोरं विशसनं कुर्वन्ति । सन्ध्यारात्री नौ परिगृह्य युद्धकोलाहलं द्रष्टुं गते यावन्न प्रतिनिवर्तितुं संमन्वाते तावत् संत्रस्तावावां पिता च कोपिष्यतीति त्वरितं प्रपलाय्योपागतौ स्वः ।

भृङ्गिरिटिः— अहो कलहोत्साहिता नारीणाम् ।

मूलं निषिञ्चन्त्यभिवर्धयन्ति
पश्यन्ति हृष्टा उपचीयमानम् ।
वाचा प्रवृत्तं क्वचिदाविशन्ति
दृष्ट्वा स्वहानिं कलहाद् द्रवन्ति ॥ १२ ॥

विनायकः— सत्यमाह भवान्। पश्यतु पुरतः ।

(ततः प्रविशतः सपटीक्षेपं संभ्रान्ते प्रदोषसन्ध्या शिवरात्रिश्च)

सन्ध्यारात्री — (सभयसंभ्रमम) अहो अत्याहितम् । अहो अत्याहितम् ।

विनायकः — (सपरिहासम्) भवत्यौ, किमिति किमिति ।

रात्रिः— अहो, भृङ्गिरिटे, राक्षसाः । अलकायां राक्षसाः ।

विनायकः— किं प्रेक्षिताः । भवत्यौ, किं प्रेक्षिताः ।

सन्ध्या— निहतो यक्षेश्वरः । निष्पिष्टं यक्षबलम् ।

रात्रिः — न कोऽपि राक्षसपतेर्दशकण्ठस्य पुरः स्थातुं शक्नोति ।

भृङ्गिरिटिः— हा धिक्, किं यक्षेश्वरो निहतः ?

स्कन्दः— भृङ्गिरिटे, अलीकमेतत् ।

रात्रिः — बाढं, भृङ्गिरिटे, सर्वोऽप्येवमाचष्टे सर्षिसिद्धसङ्घः सुरकिन्नराप्सरोनिकुरुम्बः सन्दर्शनार्थं मिलितः ।

सन्ध्या — अहो, कारुण्यम् । नेत्रदर्शमश्रु परिस्रवति । क्रन्दन्ति स्त्रियः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

क्षुभ्यन्ति वीराः । परिवस्यन्ति साधिकाराः किमयं दशाननोऽस्मदभिमुखो भविष्यतीति ।

रात्रिः— कान्दिशीकः परिद्रुतश्च सर्वः प्रेक्षणकप्रवृतो नभश्चरसङ्घः ।

विनायकः— किं भवत्यौ तस्याग्रतः उत पश्चात् ।

भृङ्गिरिटिः— भवति, कः परमलकावृत्तान्तः ।

रात्रिः— किमपरम् ? विशसिते यक्षबले निहतेषु हेममालिप्रमुखेषु बलाध्यक्षेषु, भग्ने विद्रुते चामात्यमाणिभद्रे, व्यापादिते च यक्षेश्वरे, —

विनायकः— भवति, स व्यापादित इति किं प्रत्यक्षदृष्टम् ।

स्कन्दः— आर्य, अलीकमेतत् । ननु, प्रतिनिवर्तमानयोरावयोः, स किल केनापि सुहृदा गगनमुत्क्षिप्य नीयमानो दृष्ट आवाभ्याम् ।

रात्रिः— भवितव्यम् । मृताः स्वलु स्वर्गमारोहन्ति ।

भृङ्गिरिटिः— अहो विप्रतिपत्तिर्भवत्याः । शान्तं पापम् । शान्तं पापम् । अथाद्य, किमाचारा नक्तंचराः ।

(नेपथ्ये)

पुरस्तान्नश्यन्तो भयपरवशा भो दिविषदः
श्रयध्वं नः सन्धां धनदजयनान्दीसुविहिताम् ।
विधाता लङ्केशो दिगधिपसमाजोग्रकदनं
त्रिलोकीसाम्राज्यप्रकरणविधेरामुखमितः ॥ १३ ॥

सन्ध्या— अहो आतङ्ककर आघोषः ।

रात्रिः—अहो क्रूरो व्यवसायः ।

भृङ्गिरिटिः— नूनं तस्यैवैष आरवः पुनरुक्तपञ्चाननस्य नक्तंचरपतेः यत्प्रतिशब्दमुखराणि दशापि दिङ्मुखकन्दराणि । कदाचिदेष दुर्मतिः दोर्मदमूर्छापरतन्त्रपरिस्पन्दः सन्नह्येदपि भगवति । तत् क्षिप्रं नन्दिकेश्वरस्य सर्वं यथावगतमावेदयामि । भवत्यौ, बालकावुपगृह्य देवीपार्श्वं नयतम् ।

सन्ध्यारात्री— तथा (इति बालकाभ्यां भयमभिनयन्त्यौ निष्क्रान्ते ।)

भृङ्गिरिटिः—हा धिक् । अस्मिंश्च सङ्कटे प्रत्यासन्ने देवीदेवयोरन्तरः संवृत्तः ।

बहिराविद्धयमानानां दैवस्य दुरुपक्रमैः ।
अन्तच्छिद्रात् परं नास्ति शोकस्थानं सचेतसाम् ॥

इति निष्क्रान्तः ।

इति प्रथमोऽङ्कः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशत्याकाशे श्रवणं नाटयन् देवदूतः)

देवदूतः—(अधोऽवलोक्य) अहह, एते खलु भीषणाः पञ्चषा राक्षसा विजयाट्टहासविघट्टिताण्डभित्तिं दशमुखमनुप्रपतन्तः कासरा इव कुवलयिनीं सम्प्रत्यनाथामलकां निर्दयमालोडयन्ति । (अन्यतः समवतरणं नाटयन्) अहो महद्भयमुपस्थितमदितिसम्भवानाम् । यत्पुरा हिरण्यकशिपुना तदल्पम् । दारुणः कोऽप्युपक्रमोऽयं समुन्मीलति सुरविद्वेषिण्या भवितव्यतायाः । अधुना किल दशकण्ठः—

धत्ते दारितमोटितप्रविरलं मन्दप्रभं नन्दनं
बन्दीरप्सरसो हरत्यनुदिशं विक्रम्य दृग्गोचराः ।
? मृद्नाति त्रिदशैकदर्शमपहन्त्यार्षा वितानक्रियाः
(सनिःश्वासम्)
स्तब्धाः स्मः परिवर्धिनोऽस्य तरसा वात्याभिभूता इव ॥ १५ ॥

अथवा कुतोऽस्येदृश्यनिवार्यता यदि ब्रह्मणोऽयं न लब्धवरः । हा धिक् । विदितरक्षःप्रकृतिरपि स कथं पितामहः देवैरजय्यत्वमस्मै वरं प्रादात् ।

कः प्रक्षीणं व्यालं दयया दुग्धेन जीवयेदजडः ।
उदितैरुदितैरेतैः सुरपीडामेष किं न जानाति ॥ १६ ॥

अहो दाक्षिण्यप्रकृतिरस्वार्थनिष्णातश्च विज्ञानधनः शमनिरतः साधुजनः । अथवा दुर्विभाव्या दैवगतयः, अनस्मद्गोचरश्च कार्यत्रयप्रभविष्णूनां संविधानसङ्केतः । भवतु, तावन्नियोगमनुतिष्ठामि । (किञ्चिदवतीर्य पुरोऽवलोक्य) हन्त, चक्षुषोः साफल्यम्—

शृङ्गैरन्यैरपि च हिमवानेष तुङ्गानुभावो
येनैकेनेश्वरमधिवहन्नस्त्यसामान्यधन्यः ।
शैत्येनेव प्रसभमुपलीभूतशर्वेन्दुभासा-
मुच्छ्रायोऽयं तरलितदिनप्राभवः श्वेतशैलः ॥ १७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अहो अस्यानुभावपरिपाटी—

रूप्यप्राये धातवो यस्य सानौ
हैमाश्चूर्णाः शर्करा रत्नजातम् ।
यस्मिन् गुल्माः कल्पवल्लीनिकुञ्जा
देवो यस्मिन् शङ्करः कोऽपि मिल्लः ॥ १८ ॥

(पुनरवतीर्य) कथं न कोऽप्यत्र दौवारिको नन्दिप्रमुखः । अनस्तमित एव खलु भानौ स्वामी भगवन्तमीश्वरं दिदृक्षते । (परितो दृष्ट्वा) कथं दूराद्देवर्षिर्नारदः—

तन्त्रीयोगं विदधदपि यो विग्रहे पक्षपाती
तुल्यं मित्रं सुरदनुजयोर्विश्वसञ्चारशीलः ।
मन्त्राणां यो मुरदमयितुर्मर्मसर्वस्ववेदी
यस्योपायः सततमपरिक्लिष्टसिद्धिस्तृतीयः ॥ १९ ॥

अस्मिंश्चावसरे अस्याविर्भावो न लक्ष्यशून्यो भविष्यति । इतोमुख एवाभिवर्तत इव च । तदेनं प्रतिपालयामि । (इति तिष्ठति)

(ततः प्रविशत्याकाशे वीणां गृह्णन् देवर्षिर्नारदः)

नारदः— चिरस्य खलु उपलक्षणमात्रभूतां महतीं वहामि । विषमोऽयं कालो न ददात्यन्तरं मधुरालापिन्या अस्या एकान्तवादनप्रसङ्गस्य । यत्सत्यमधर्मोद्रेकदुःश्लिष्टे लोके संयोज्यमाना अपि विसंवदन्त्यस्या गुणाः । जगत्यां त्रुट्यत्सु साधुमनोरथेषु त्रुट्यन्त्यस्या दृढा अपि तन्त्र्यः । स्वमहिम्नः परिभ्रश्यत्सु आर्यमतिषु विस्रंसन्ति स्वरकोणेभ्यः प्रवर्तिता अप्यङ्गुलयः । दुरवस्थिते धर्मे घट्टितान्यपि कीलकानि मे विश्लथीभवन्ति । समासतः प्रियाऽपि मे विपञ्ची भुवि भरार्तायां भारभूता वर्तते । न च त्रिविष्टपकदनानि विषमाण्यप्रशमय्य सुकरसंयोगसरलामेनामुपलालयितुमाशंसे । अहह, भोः, विप्रकृष्टतरः खलु विभात्यस्य मनोरथस्योपलम्भः । यदयमुपेक्षित इव महारोगस्त्रैलोक्यस्य परिवर्धते दशमुखं दशकण्ठः । अद्य च अलकावृत्तान्तेन दत्तकम्पो निष्ठाशून्यं लालप्यते सुरलोकः को नः शरण्यो भविष्यतीति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

क्रीडन्ति नन्दनवने न वधूसहाया
नैवाप्सरोनटनगीतिरसान् विशन्ति।
पातुं न चामृतममी सुचिरात् स्मरन्ति
स्वर्वासिनो निशिचरेन्द्रभयाभिभूताः॥ २०॥

अहो सुदूरारोही सुराणां रणरणको दशाननभूः।

यतः,

दशदशनच्छददशमीदशदिग्दशरूपकादिपदघटिते।
आद्याक्षरयुगमात्रे श्रुतेऽपि भीत्या प्रवेपन्ते॥ २१॥

अथवा प्रतिनियता खल्वेषा सृष्टिक्रमे दशापरिवृत्तिवैचित्री। येन सुखमनु दुःखं दुःखमनु सुखं च परिवर्तते शरीरिणाम्। किञ्चैतत् पश्यामि सुविहितमेव यदनपेतविपदः सांसारिकाः सम्पद इति। एकान्तभाग्योदयविस्रम्भे यद्दोषौन्मुख्यं चलचित्तानां तद्विशोधनप्रतिभूः प्रवेशमर्हति किल दौरवस्थ्यसंघटना। अपि चैवमप्यत्र समर्थनीयं भाति—

लीनान् विभासयति मान्यतमान् गुणौघान्
भक्तिं प्रसञ्जयति भर्तरि विष्टपानाम्।
अग्रे प्ररोचयति भाविनमेव सौख्यं
संसारिणां भवति दुःखदशाऽपि योग्या॥ २२॥

तदिह महति विधेश्चक्रयन्त्रे परिभ्रमिते मया खलु तन्नाभिभूतस्य ब्रह्मणः पुत्रेण तत्प्रवृत्तिमनुरुध्य किमपि किमपि मन्त्रनर्म तदा तदा अनुष्ठेयमापतति। तेन ह्यस्य राक्षसपतेरलकातः प्रतिष्ठासोः दृक्पथमवतरामि। (इत्यलकाभिमुखं प्रतिष्ठते।)

देवदूतः— (दृष्ट्वा) किमनया दिशा नाभिवर्तते। तदुपसर्पामि। (उपसृत्य) महर्षे, महेन्द्रदूतोऽहमभिवादये।

नारदः— अभिमतेन युज्यस्व। किमत्रागमनकारणम्।

देवदूतः— सुरपतिरादिशति— 'गच्छ, भवानीपतिं द्रष्टुमिच्छामि, अस्मिन् महति सङ्कटे प्रतिविधानविधेरनुकम्पामर्थयितुम्। जानीहि शीघ्रं कोऽवसर इति' इति। उपस्थितस्य चात्र न मे कोऽपि दौवारिक उपलब्धः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः— भवतु तावत् । 'अहमत्र व्याप्रिये देवकार्ये । ब्रूहि महेन्द्रम् । विस्रब्धं स तिष्ठतु'

देवदूतः—बाढमनुग्रहः । (इति निष्क्रान्तः ।)

नारदः— (अलकाभिमुखं समवतरणं नाटयन्) अहो निरवग्रहः कालपुरुषस्य महिमा यस्य प्रकोपपरीवाहे जगत् कवलीकुर्वति वैतसीं वृत्तिमभिमन्वते ईश्वरा अपि । अथवा केनेदृशेषु प्रतिविधेयं रोमहर्षणेषु ओजस्समुन्मेषेषु ।

चण्डांशोर्दहतो जगन्ति वहतो वातस्य विक्षोभिणः
प्रोद्वेलस्य महोदधेः प्रपततो प्राव्णो ग्रहस्यापि वा ।
वेगं कः प्रतिरोत्स्यते यदि शमं नो यान्ति जीर्णाः स्वयं
निःशेषाहितवैशसा उत हताः स्वेनैव वा दुष्क्रमैः ॥ २३ ॥

(भानुमालोक्य) अयमेव चात्र निदर्शनं भवति—

मध्ये तुलामधिगतः परमां दिनस्य
यन्निर्घृणो भुवनमेष ददाह भानुः ।
तस्यैतदव्यवहितं फलमस्तशैले
भ्रश्यत्करो लुठति दर्पणकन्दुकल्पः ॥ २४ ॥

तदस्य लोककण्टकस्य निःशेषोद्धरणे कालः प्रतीक्ष्यः । तात्कालिकस्तु विधिः यः कोऽपि नारदायत्तः ।

(नेपथ्ये)

जय जय कुबेरवैरिन् जय रक्षोधिपते ।
जय जय सुरावमर्दिन् जय लङ्केश विभो ॥ २५ ॥

इत इतो देवः ।

नारदः— (श्रुत्वा अधोऽवलोक्य) अये एष हि दशाननः ।
विंशतिकुण्डलताराविद्योतितदशशिरःकूटः ।
अञ्जनगिरिरिव विचरति पञ्चषनक्तञ्चरानुचरः ॥ २६ ॥

पुनर्निर्वर्ण्य) पात्रमद्यतनं वीरलक्ष्म्याः प्रणयसन्ततेः ।
अहो विराजते भीमो राक्षसेन्द्रो निजौजसा ॥ २७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

किमुपसर्पामि ? (विचिन्त्य) अथवा प्रतिपाल्योपसर्पामि । प्रथमं खल्वग्रे चिकीर्षितमेषामवधर्तव्यम् ।

यथावन्नामिधास्यन्ति परमर्मेङ्गितान्यपि ।
विविक्तोपश्रुतेः शस्तं परेषां मन्त्रमार्गणम् ॥ २८ ॥

तददर्शने तिष्ठन् वृत्तान्तमुपलप्स्ये । (इति मेघमालान्तरितो निष्क्रान्तः ।)

शुद्धविष्कम्भः ।

ततः प्रविशति प्रहस्त-विद्युज्जिह्व-महोदर-मारीचैः सदीपिका-हस्ताभ्यां शुकसारणाभ्यां च अनुगम्यमानो दशाननः ।

शुकसारणौ— जय जय कुवेरवैरिन् जय रक्षोधिपते ।
जय जय सुरावमर्दिन् जय लङ्केश विभो ॥ २९ ॥

मारीचः— इत इतो देवः ।

दशाननः— (परिक्रामन्) सखे, महोदर, काममभिनन्दयसि मां, न मेऽत्र परा कृतकृत्यता । पश्य,

यन्मायामययुद्धमोहितमतिर्व्यक्षेपि यक्षेश्वरो
यन्मन्त्री माणिभद्रो विघटितमुकुटः शोणितोद्गार्यकारि ।
शौर्यं मे न न दर्शितं परमिदं कोणेऽवितृप्तं मनः
पूर्वो यन्नावबद्धो मणिरपि शिरसोऽन्यस्य नोत्पाटितो यत् ॥ ३० ॥

महोदरः—युज्यते । यत्सत्यं ममाप्यस्त्यत्र पश्चात्तापस्यावसरः । धिङ्मां मन्थरधियं यः प्रत्यग्रां कटुष्णामुद्विद्यदान्त्रनलिकोद्गीर्णां यक्षपशूनामसृग्धारामातृप्ति तदाहं न पीतवान् युद्धकोलाहलविस्मृतात्मा, अद्य च महत्या तृषा परिबाध्ये ।

दशाननः— (स्मयते)

मारीचः— इत इतो देवः ।

प्रहस्तः—तदेतच्चैत्ररथं नाम यक्षेश्वरोद्यानम् । प्रविशतु तावद्देवः । अत्र हि,

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्दारद्रुममञ्जरीं परिमृशन् सन्तानमान्दोलय-
न्नाश्लिष्यन् हरिचन्दनं परिचयं कल्पद्रुमे वर्धयन् ।
संजिघ्रन्नवपारिजातकुसुमं सौगन्धिकस्याहर-
न्नामोदं हि यथायथं व्यवहरत्येष प्रवीणोऽनिलः ॥ ३१ ॥

विद्युज्जिह्वः— अस्मिन् खलु, अनुबद्धदिवसयुद्धपरिश्रान्तस्य स्वामिनो मुहूर्तमात्रं स्वादीयान् विश्रमो भवितुमर्हति ।

महोदरः— अवितथम् । यदि वयं वायुभक्षाः । मम तु महोदरस्य महानसादन्यत्र न मनागपि विश्रान्तिलाभविस्रम्भः ।

मारीचः— इत इतो देवः ।

विद्युज्जिह्वः— अत्र कल्पवृक्षस्याधस्तात् चन्द्रकान्तमणिवेदिकायां सुखासिका भवतु देवस्य । (इति दर्शयति)

दशाननः— बाढम् । (इति मणिवेदिकामुपसृत्य) अथ यूयं न निषीदथ ?

विद्युज्जिह्वः— वयं यथाकाममास्महे । प्रथमं निषीदतु देवः ।

दशाननः— तथा इत्युपविशति)

विद्युज्जिह्वः— एष सुमृष्टः शिलामयः तल एव नः कमनीयमासनं वर्तते ।

[शुकसारणौ पार्श्वयोर्दीपिके अवस्थापयतः । महोदरवर्जमन्ये परितो भूमावुपविशन्ति]

महोदरः— (सवैलक्ष्यम्) अहो अविशाला मन्त्रिप्रवराणां बुद्धिः । यथावच्च फलितास्मास्वद्य लौकिकी विडम्बना, यद्विलुण्ठ्यमानेऽपि कुबेरपत्तने 'वराटिकापिटकमादत्ते नित्यदुर्भग इति । ये खल्वतिसङ्कुचितं चिन्तयन्ति किं ते विशालमाचरिष्यन्ति । कष्टमनुदारमतिता नाम परिवाराणां या परपराक्रमोपार्जितमपि स्वाम्यं स्वयमनुभवितुं नान्तरं ददाति । एष विद्युज्जिह्वमहाशयो ब्रूते, 'भूपृष्ठं नः कमनीयमासनम्' इति । किं मञ्चमारोपितोऽस्यात्मा कण्टकतल्पादिवोद्विजेत ? धिग्धिगेतदवितथमौपचारिकदैन्यम् । अहो कुबेरसभायां शतं न वर्तन्ते नव-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रत्नखचिताः सौवर्णमञ्चाः। अपि च, राजराजजेता देवो नः कौवेरं सिंहासनमध्यासितुं नार्हति। धिग्युष्मान् राजपथं परिहृत्य कीकटगामिनः। किं च, मे महोदरस्य किं युष्मदादेशवशंवदं लघूत्थानयोग्यं वपुरद्योपवेष्टुं पुनरुत्थातुं च ?

(सर्वे हसन्तः उत्तिष्ठन्ति)

दशाननः— सम्यगाह महोदरः। शुकसारणौ ! गत्वा कौबेरमुत्तरदिगाधिपत्यलक्ष्मभूतं सिंहासनमाहरतम्। इतरच्च मञ्चषट्कम्।

शुकसारणौ— तथा (इति निष्क्रान्तौ)

दशाननः— (लघु परिक्रामन् अवलोक्य) महोदर, किं न पश्यस्यद्य निशानाथोद्गमोपचितशोभाविशेषं प्राचीमूलम्।

प्रावारकं समुपगृह्य तमः प्रदोषे
क्रीडारसात् पिहितमूर्तिमतीर्दशाशाः।
अन्वेषमाण इव लोकमभिप्रवृत्त-
श्चन्द्रः प्रकाशयति ताः प्रहसन्नुपेत्य ॥ ३२ ॥

महोदरः— नूनमतिरमणीयं वर्तते निशामुखम्—

इतः क्षीणामोदं कमलवनम्,

प्रहस्तः— ... ... एषा कुमुदिनी

चलोदञ्चद्भृङ्गीमुखररशना,

विद्युज्जिह्वः— ... ... भूरिविशदः।

दिशां सङ्घः ... ...

दशाननः— ... ... त्वङ्गद्धनुरयमनङ्गः,

मारीचः— ... ... किल विधौ

महोदर-प्रहस्त-
विद्युज्जिह्व-दशानन-
मारीचाः— (क्रमेण)—

निमीलत्युन्मीलत्युपहसति दृप्यत्युदयिनि ॥ ३३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(प्रविश्य आसनान्युपनयन्तौ)

शुकसारणौ— जयतु, जयतु देवः । इदं कौबेरं सिंहासनम् । इमे च मञ्चाः ।

प्रहस्तः— अध्यारोहत्वमुं देवो विजयाय ।

दशाननः— (सिंहासनमध्यास्ते)

शुकः— जयतु जयतु देवो बद्धहेमाङ्गदालि-
च्छलनियमितशौर्यश्रीकसश्रीकबाहुः ।

सारणः— जयतु जयतु नाथः सामिवीक्षाविवक्षा-
क्षणनिपुणपरार्धोत्तसमांसाशनेड्यः ॥ ३४ ॥

प्रहस्तः—केकस्याः संप्रदानादुपरचिततलं मातृतातैः पुरस्तात्
त्वज्जन्मप्रोप्तबीजं तदनु विदलिताङ्कुरमुग्रैस्तपोभिः ।
लङ्काप्रत्याप्तिपुष्टं मयदनुजसुतोद्वाहलब्धप्रसेकं
श्रेयो यक्षेशभङ्गे जयति किसलयग्राहि रक्षोऽन्वयानाम् ॥ ३५ ॥

दशाननः— (सहर्षम्) अयि भोः, प्रियामात्याः, यूयमपि मञ्चानलङ्कुरुत ।
(सर्वे मञ्चेषु निषीदन्ति)

विद्युज्जिह्वः— एवमेव सर्वदिक्पालानामपि सिंहासनान्यधिरोढुमर्हति देवः क्रमेण ।

प्रहस्तमहोदरौ— बाढम् । अचिरादेवेति वक्तव्यम् ।

दशाननः— (वामाक्षिस्पन्दनं सूचयन्) निष्प्रत्यूहा भवत्वाशंसा वः । अथ यक्षेश्वरस्याद्य कीदृशी प्रवृत्तिरिति किं शक्यं परिज्ञातुम् ।

प्रहस्तः— प्रहारजर्जरः स भूपृष्ठशायितः केनापि सुरपक्षपातिना महेन्द्र-सविधं नीत इति प्रतीयते ।

शुकसारणौ— देव, मञ्चाहरणार्थं गतयोरावयोः कोप्यभिमुखीभूतो यक्ष-पुरुषो वैश्रवणप्रेषितं दूतमात्मानं व्यपादिक्षत् । स च तोरणोद्देशे 'अवसरं प्रतिपालय' इति आवाभ्यामवस्थापितः । स किं प्रविशतु । श्रुत्वा देवः प्रमाणम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दशाननः— (मन्त्रिणः अवलोक्य) किं प्रविशतु ? अथवा असन्दिग्ध-समरविजयारोहाणामस्माकं किमस्ति प्रयोजनं दूत्यसमुदाचारसम्भावनया।

महोदरः— भवन्तौ, कीदृशः स दूतः सामान्यः, उत विशिष्टः ?

सारणः— सामान्य एव प्रतिभाति।

महोदरः— भोः अयुक्तमेतत्। तन्न द्रक्ष्यामः।

स्वयं समरनिर्वाणः प्रतिबोध्यो दशाननः।
सामान्यप्रेषणेनात्र प्रतिपत्तिर्न साम्प्रता ॥ ३६ ॥

प्रहस्तः— देव, पश्यामस्तावत् किं प्रतिपादयिष्यतीति।

विद्युज्जिह्वः— किं चानेन प्रसङ्गेन विपक्षप्रवृत्तिरूपलभ्येत।

दशाननः— अस्त्येतत्। सारण, प्रवेशय दूतम्।

महोदरः— तेन हि प्रविशतु वराकः।

सारणः— तथा (इति निष्क्रम्य दूतेन सह प्रविश्य) अरे, उपसर्प लङ्केश्वरम्।

यक्षः— स्वस्ति रक्षःकुलनाथाय। अद्य खलु कथञ्चित् कुशली यक्षेश्वरः—

दशाननः— कुत्र तेऽधुना स्वामी ?

यक्षः— स्वर्लोके।

महोदरः— युज्यते। सहि युद्धेऽनिवृत्तपदो वीरस्वर्गमर्हति।

मारीचः— (जनान्तिकम्) इयती परिहीणा स्वर्लोकस्यार्घमात्रा यत्कातरा अपि तमारोहन्ति।

दशाननः— किमलकाप्रत्याहरणार्थं पुरन्दरसाह्यं वृणुते ?

यक्षः— न न। भवतैव खलु सन्धित्सता राजराजेनाहं सन्देशहरः प्रेषितः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रहस्तः— शरणागत्याः प्राप्तेऽवसरे सन्ध्यभिसन्धिनिष्ठता विडम्बना भवति ।

दशाननः— भवतु नाम । स्वनियोगमनुतिष्ठतु वराकः । अरे, कः सन्देशः ?

यक्षः— इदं यथाभिहितं यक्षेश्वरेण—

निर्दिष्टं जनकेन राज्यमहरः पूर्वं तदास्ताञ्च वा
प्राप्तामीशकृपालवात्त्वमलकां भूयः प्रमुष्णासि मे ।
कामं नौ वत विश्रवा गुरुरभून्मैवात्र भूर्विश्रवा
युक्तं ज्येष्ठनिपीडनं श्रुतवतः सन्धिं तद्भङ्गीकुरु ॥ ३७ ॥

विद्युज्जिह्वः— इदमगतिकत्वाच्चरणावलेहनं नाम । सन्धिप्रस्ताव इति दुरभिधानम् ।

महोदरः— अहो, भग्नपृष्ठास्थिनालस्य समरपरिभ्रष्टस्यापि धनदस्य न तावत् स्तब्धता व्यपगता, यद्भवते भ्रातृधर्ममुपदेष्टुमिच्छति ।

प्रहस्तः— मम तु स्वामिवैश्रवणयोर्भ्रातृत्वनिर्देश एव कर्णौ दहति । सुविदित एव हि लोके वैमात्रेयाणां भ्रातृभावः कीदृश इति ।

विद्युज्जिह्वः— सम्यग्दृष्टं प्रहस्तेन । सुरराक्षसयोर्नैसर्गिके प्रभवति वैरे किं मुधा भ्रातृत्वनिर्देशविडम्बनया । आचामृतमथनसन्धिच्छलात् समधिगताः खल्वेते शठा जनार्दनप्रष्ठा नाकिनः । निरन्तरमस्माकमनिष्टमनुध्यायन्ति । अहह, एते हि नाम धर्मिष्ठाः, अकल्मषाः, अपरोपमर्दिनः, अच्छलाः । धिक् धिक् धूर्तधौरेयान् । पूर्वदेवा वयमास्म किल प्रभविष्णवः सर्वस्याः सवनार्णवाया अस्या मह्याः । यावदतिगहनकुहनासंप्रदायदुर्ललितेन महेन्द्रसाम्राज्यप्रत्यवेक्षणपक्षपातिना पुण्यजनार्दनेन जनार्दनेन वयमेतादृशीं दुरवस्थामुपलम्भिताः । सुरेतरोपभोगामर्षिणाऽनेनैव किल वयं लङ्कामात्रनिर्वृता अपि निर्विषयीकृताः । अथान्यदपीदं निरङ्कुशमुद्घोषयामि यदविश्वसनीयचरिता न केवलं सुराः परं तु सुरपक्षपातिनोऽपि । अत्र यदि मे गीर्देवस्य गुरुं परामृशति तत्र मयि क्षन्तव्यम् । केषामेषा लङ्का, कस्तामावासयति ? ब्रह्मलब्धवरः कुबेरो विनीतवत् पृच्छति—'पितः, न मे पितामहो निवासं कल्पयामास । तत्कं प्रदेशमावासयामि' इति । वत्सलो विश्रवा ब्रूते—यः स्वामिनं लोकैकवीरं तपसे प्रतिष्ठमानमापृच्छमानं प्रतिमुखं वीक्षितुमपि संकुचति स्म—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रहस्तः— निष्कल्मषः!

महोदरः— अपरोपमर्दी!

मारीचः— परमधार्मिकः!

विद्युज्जिह्वः— आम, आम। स तपस्वी ब्रूते—"वत्स! — "

महोदरः— स्तनन्धयः खलु!

प्रहस्तः— न तु केकसीसम्भवास्तस्य वत्साः स्वप्नप्रलपितेष्वपि।

विद्युज्जिह्वः— "वत्स, विश्वकर्मणा निर्मिता लङ्का शून्या तिष्ठति। तामावासय" इति।

महोदरः— विश्वकर्मनिर्मितत्वमात्रेण देवदाये पतति खलु?

मारीचः— कस्य निदेशेन निर्मिता?

विद्युज्जिह्वः— अहो न्याय्य आचारः। कस्य स्वं कस्मै प्रदीयते। कस्तत्र प्रमाणम्। यत्सत्यं निष्ठुरहृदया घातुका एते सुराः सुरपक्षपातिनश्च न ह्यरन्निमात्रामपि भुवं राक्षसेभ्योऽवशिष्यमाणामभिमन्यन्ते।

दशाननः— समीचीनं खलु काले समुद्बोधितोऽभवं तपसे सुरदुर्नयोपमर्ददुर्विधनिजकुलोद्दिधीर्षाव्यग्रचेतसा तत्र भवता मातामहेन पूज्यचरणया अम्बया च।

विद्युज्जिह्वः— अवितथमाह देवः। अद्य च परिणतो दुराशयानां दिविषदामास्पदभ्रंशमापादयिता कालपर्ययः। यदस्मासु तैश्चिन्तितं तत्तेषां शतगुणं परिणामयिष्यते। यदि रक्षोऽन्वयभवानां नाभविष्यदीदृशोऽप्रमेयः पौरुषनिर्वाहः, चिरायास्मज्जातेरपि नाम प्रामार्जयिष्यन् भुवस्तले दुरभिसन्धयो दिवौकसः।

यक्षः— (स्वगतम्) अस्मिन् कोलाहले प्रसुप्तशेमुषीकैरेभिरलक्षितो यावत् परिभ्रश्यामि स्वामिनो नियोगमविकलीकर्तुम्। (इति शनैर्निष्क्रान्तः)

मारीचः— पौरुषमिति! किं तद्देवस्य पौरुषं किञ्चिदपि वाचा प्रपञ्चयितुमलम्? एतदुद्दीर्णरोमहर्षं मे गात्रं शंसति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अद्रेश्चूर्णनमब्धिशोषणमुपारोहोऽम्बरान्तस्य वा
तैलापादनमश्मनोऽपि सुकरं सम्भाव्यते कर्हिचित् ।
कस्तप्त्वा ह्ययुतं समा नव शिरांस्यग्नौ चहुत वा बला-
दाच्छिन्द्यात् त्रिदशानुवर्तनशठादन्यो वरान् ब्रह्मणः ॥ ६८ ॥

दशाननः – (सलज्जाक्षेपम्) प्रणयेनातिलङ्घ्यते समुदाचारः । अनुग्रहः खल्वचिन्त्यरूपो दर्शितो मयि अनर्हेऽपि नप्तृवात्सल्यपेशलमनसा पितामहेन । तद्विश्राम्यतु नाम । अद्य दिष्ट्या प्रतिष्ठमाना वयं शर्म विपक्षाणां न मृष्यामो लवमपि । तथा चैष समासः । अरे, दूताधम ! कुत्र नु खलु, सयक्षदूतः ?

सर्वे – (ससंभ्रमम्) कुत्र नु खलु ? कुत्र नु खलु ?

मारीचः— अहो मायाविनः आदित्याः । पश्यतामेव हि नः परिभ्रष्टः कितवः ।

महोदरः— शृण्वतामेवेति वक्तव्यम् । अत्र हि विद्युज्जिह्ववावदूकमहाशयस्य मौखर्येण पविवर्षेणेव परिघुष्टासु दिशासु श्रोत्रप्राया वयं संवृत्ताः ।

प्रहस्तः— स दूत्येनागत इत्यपि न विश्वसिमि । किं तु वृत्तान्तजिज्ञासुः स्वर्लोकाचारः प्राप्त इति मन्ये ।

दशाननः— भवत्वेवमेव । महोत्पातमागामिनं सूचयत्वेष दुर्निमित्तमिव पुरो गोचरीभवन् सुरयक्षेश्वरयोः । अनुपदमेते वयमुत्तिष्ठामः स्वर्लोकविजयाय । अविभातायामेवास्यां शर्वर्याम् इन्द्रो निजमहिमावसानपिशुनम् उत्थितं विंशतिविधं धूमकेतुमिव युद्धोद्यतं मद्बाहुदण्डकाण्डं द्रक्ष्यति । (इति सक्रोधावेगमुत्तिष्ठति)

प्रहस्तः— प्रथमः कल्पः ।

(अन्येऽप्युत्तिष्ठन्ति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

महोदरः— विजयप्रस्थाने वाहनारूढैर्भवितव्यमिति सार्वलौकिकमेतत्। विजितकुबेरपत्तनैः स्वर्लोकविजयमाशंसमानैः धिगस्माभिः पक्षिगणवदुड्डयितव्यम्।

मारीचः— देव, विजितायामलकायां विजितं हि नः पुष्पकं विमानरत्नम्। तत् किं न—

दशाननः— साधु साध्वनुस्मारितोऽस्मि।

मारीचानय पुष्पकं गगनगं दैवं विमानोत्तमं
सर्वाश्चर्यनिधिं, यदद्य परमं भाग्यं जिगीषोर्मम।
साह्येनास्य मनोजवः परिपतन्नारात्प्रमृद्नामि दिक्-
पालान् वैरिकथाविरामसुखितानुद्वेजयन् क्ष्वेलितैः॥ ३९॥

मारीचः— यदादिशति देवः (इति निष्क्रान्तः)

प्रहस्तः— अथाद्य अनाथामिमां यक्षपुरीं प्रति किमनुशासनमिष्यते देवेन।

दशाननः— प्रहस्त, किं विधानमिति कथं गरीयसी निवेदना क्रियते। शृणु तावत् यदि मन्मुखात् श्रोतुमिच्छसि।

निःशेषं क्षिप यक्षलोकमधुना बद्ध्वा गिरेर्गह्वरे-
ष्वेषामाहर योषितस्सुनयना अत्रोपभोक्ष्यामहे।
संगृह्याखिलकोशसारमनलस्यैनां पुरीमर्पय
द्रागावासय वा निशाचरकुलैर्लङ्काद्वितीयास्त्वियम्॥ ४०॥

महोदरः— यत्कोशसारग्रहणं तत्क्रियते व्याप्रियमाणैरस्माभिः। अन्यत्तद्देवशासनं दुष्करं पश्यामि। ते खलु सस्त्रीबाला यक्षा व्याधज्याघोषवित्रासिता इवाण्डजाः स्वावासवृक्षम्, नः सिंहनादश्रवणक्षण एव अलकां परित्यज्य खमुत्पतिताः कुबाप्यपसृत्य निलीनाः।

विद्युज्जिह्वः— तेन हि सुखमावासयामः किल सम्प्रत्येव पुरीम्।

महोदरः— किं यक्षपुरी विजयमात्रनिर्वृता विरमामः। एवं च स्वर्लोकाभिषेणनशौर्यपरिस्पन्दः शान्त इति मन्ये।

दशाननः—वयमुच्चलिष्याम एव। किन्तु, यावदावासनार्थं लङ्कातो नक्तंचरा आनाय्यन्ते तावदस्माभिरन्यतमः सुगुप्तामेनां कुर्वन् प्रत्यवेक्षिष्यते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

महोदरः— तत् कं पश्यति देवः सदृशं गुरुकेऽस्मिन् नियोगे भरसहं विश्वसनीयं च ? अयि भो रक्षःपते, ममापि नाम महोदरस्य भवदनुवर्तनसाहसेनानारतं युद्धरङ्गेष्वभिप्रवृत्तस्य प्रशिथिलप्रायाः सन्धिबन्धाः । तत् कृतं दीर्घेण चिन्तायासेन । अहमेवात्र युवराजस्तिष्ठामि, यस्य खलु निकाममशनाभ्यन्तरेषु विश्रमो भविष्यति अत्र मणिकुट्टिमेषु लुठतः ।

दशाननः— (स्मित्वा) न तु मे महोदरमपहाय प्रादेशमात्रमपि कुत्रचित् यात्राशंसा । भवत्वेवम् । शुकसारणावत्र नियोक्ष्ये । तयोश्च शुकः सद्यो गत्वा लङ्कास्थौ मातामहश्वशुरौ प्रबोध्य ससहस्रराक्षसकुलौ इह आनयतु ।

महोदरः— विशुद्धमेतत् । अस्माभिः प्राणसंशयं गतैः संपरायेषु दनीध्वस्यते । विजितं तु राज्यं श्वशुरस्य । क्रान्तदर्शी खलु कोऽपि बहिश्चरान् पञ्च प्राणान् परिगणयन् श्वशुरमग्रतः प्राह ।

दशाननः— (सस्मितम्) महोदर, स्वर्लोकं ते जित्वा प्रदास्यामि । सारण, यावन्मातामहागमनं तावदलङ्कायां व्यग्रो भव । शुक, त्वमधुनैव प्रस्थास्यसे लङ्कां प्रति ।

शुकसारणौ—यथा देव आदिशति (इति निष्क्रान्तौ)

दशाननः—प्रहस्त, श्रूयते खलु अक्षय्या निधयः कुबेरस्य कोशागारेषु तिष्ठन्तीति । तत्परीक्ष्यन्ताम् ।

प्रहस्तः— तथा । (प्रतिष्ठते)

विद्युज्जिह्वः— कदाचित् वीरप्रवरगुप्तानि कोशागाराणि भविष्यन्ति । तदसहायेन न गन्तव्यम् । (इत्यनु प्रतिष्ठते)

महोदरः— मां तावत् क्षुत्तृष्णे बाधेते । न मनागपि धनतृष्णा । तद्गत्वा यक्षेशितुः संभारशालां परीक्षिष्ये । यदि तत्र सुराघटकूटसङ्कटे कोऽपि निधानकुम्भ उपलक्ष्यते बाढमानेष्यामि । मुहूर्तं तावत् निर्मक्षिकं विश्रममनुभवतु देवः । सोच्छ्वासः खल्वेष भवतो विरलः क्षणः वृत्तवर्तिष्यमाणयोः यक्षेश्वरसुरेश्वरविजययोरन्तरा । अपि च, सुखाय भवतु भवते सुभगाज्योत्स्नावतीयं वेला । (इत्युत्तिष्ठति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दशाननः– (अनूत्थाय) मा चिरं विलम्बन्तां भवन्तः। निवर्तमाना मारीचं च त्वरयत।

(त्रयोऽपि निष्क्रान्ताः)

दशाननः– (सचिन्तं परिक्रामन्) अहो, कियदुच्चैर्भोगशालिन एते सुरपाशाः

वासो व्योम्नि रसातले जलनिधौ मेरौ हिमाद्रावपि
प्रत्यग्रं विजरं विमृत्यु च वयो नित्योपभोगक्षमम्।
पेया नाम सुधा यथेष्टफलदाः स्वं नाम कल्पद्रुमाः
नार्योऽष्टादशवार्षिका दशशतं सर्वार्थिसाधारणाः ॥ ४१ ॥

अहो, शाठ्यमेतेषामदितिसम्भवानां, दैतेयान् भ्रातृभावसम्भावनीयान् सर्वोपभोगेष्वपि वञ्चयन्ति। किं न स्मर्यते तैरमृतविभागसमये मर्मविदारणमाचरितमतिसन्धानदौरात्म्यम्। न च निष्कृतिरेतस्या अनीतेरद्यावधि तदा तदा समुदितैरपि महाप्रभावैः पूर्वदेववंश्यैरापादयितुमपारि। अद्य च दशाननस्य शिरस्सु कुलोद्धरणधुरा महतीयं समवतीर्णा। न खल्वहमन्तरा विश्रमिष्यामि यावदसुरराक्षसाद्वैतं त्रिभुवनं नापादयिष्यामि (उद्धतं परिक्रम्य पुनर्विचिन्त्य सनिःश्वासम्) अहा तु खलु भोः, अपि नाम दशाननस्तादृक्षमपि प्रेक्षिष्यते दिनोदयं यस्मिन् परिणतमनोरथमनोहरे, सामात्यबान्धवानुचरो राक्षसलोकैः समभिनन्दितः प्रकाममुच्छ्वसिष्यति। (विचिन्त्य) कष्टं भोः। सुदूरारोहेयमाशंसा मे प्रतिभाति। प्रक्षुब्धमिव सागरं बाहुबलेन तर्तुमिच्छामि। कालचक्रमेतदद्यावधि सुरमुख्यैः परिवर्त्यमानं बलादाच्छिद्य कथमात्मनो हस्तपरिचयं नेष्यामि। तथा हि–

वृष्टिर्वज्रधरस्य भानुशशिनोर्दीप्तिस्समन्ताद्भुवः
खेटानां भ्रमणं ध्रुवस्य वरुणस्याम्भः स्थितं नैकधा।
धातुः सृष्टिलिपी क्षयः समदृशस्तिष्ठत्यधीनं सुरै-
र्धूर्तैरित्यखिला हि भोस्त्रिजगतीनिर्वाहमुद्रा हृता ॥ ४२ ॥

(श्रुत्वा) कथं कल्पवृक्षमास्थितो निशाटो ब्रूते। शकुनसंवाद एष प्रत्याशां मे सन्धुक्षयतीव। तेन ह्यद्य अतिमहती पौरुषकला जरीजृम्भमाणा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पारयिष्यतीत्याशंसे । भवतु, पूर्वेभ्यो हिरण्याक्षहिरण्यकशिपुमुरमधुकैटभबलिसुमालिप्रभृतिभ्योऽपि दशमुखो विंशतिभुजोऽहं दशगुणं मेधया विंशतिगुणं च विक्रमेण किं न विशिष्ये। तेन ह्यचिरात् समुत्थितः-

इन्द्रः स्यां वरुणः स्यामस्मि कुबेरो यमोऽपि स्याम् ।
सृष्टिस्थितिप्रणाशेष्वपि स स एव स्वतन्त्रः स्याम् ॥ ४३ ॥

(स्मृत्वा) कियच्चिरमेते मदनुवर्तिनो न निवर्तन्ते । (परिक्रामन्) परिश्रान्त इवास्मि । यावददूरे दृश्यमानं वनराजिशिखण्डमण्डनमिव मल्लिकादामवलयम् उत्सेधवन्तं सौधमाश्रयामि मुहूर्तमात्रं विश्रमाय । (पुनः सचिन्तम्) 'इन्द्रः स्याम्'

इत्याद्यास्रेडयन् निष्क्रान्तः ।

इति द्वितीयोऽङ्कः ।

अथ तृतीयोऽङ्कः ।

(ततः प्रविशत्याकाशे समुद्विग्ना चञ्चला)

चञ्चला- अहो, अत्याहितम् । इहापि न प्रियसखी समुपलभ्यते । कः कालस्तामन्विष्यामि । कुत्र नु खलु गता भवेत् ? अथवा यथा मे हृदयं परिशङ्कते किं तथा किमपि दुरितमापतितं स्यात् ? हा धिक् ! परिस्फुरति मे दक्षिणं चक्षुः । वेपते मे हृदयम् । शृङ्खलिताविव मे पादौ न पुरः प्रसरतः । अनिमिषाया अप्यन्धीभवन्तीव मे दिशः । तत्किमिदानीं करिष्यामि । कुत्र विचेष्यामि । कं वा शरणयामि । अयि, अनुचितारम्भे, रम्भे, अयि यौवनमददुर्ललिते, अयि, मदनानुरोधपक्षपातिनि, किमेवमायासयसि प्रणयपरिप्लवहृदयं सखीजनम् अतिक्रमनीयतया प्रयत्नरक्ष्यमात्मानं च । अयि, अकालानुरोधिनि, वैयात्यनिलये, संशयावर्ते सखीजनं प्रक्षिप्य कुत्र नु खलु गतासि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शपथैः खलु मया निवर्तिता त्वं सन्ध्यासमयसन्धुक्षितस्मरावेगा प्रियतमाभिसरणाय त्वरमाणा– 'अयि, रम्भे, शिथिलयाद्य मनसिजव्यसनिताम् । रक्षोगणविचरिता न सुखं स्त्रीजनलङ्घनीया दिशः श्रूयन्ते । विशेषतो राक्षसाक्रान्ता संप्रत्यलका । अभितः किल भयं नः प्राप्तम् । तदलं संकेतानुस्मरणसाहसेन' इति । न तु तया मूढया हितजनस्य वाक्ये विस्रम्भः कृतः । नाप्युपलभ्यते कीदृशोऽद्य भर्ता नलकूबर इति । हा कष्टम् । नलिनीमिव किटिकदम्बकम् अलकमालोडितवन्तः पापिष्ठा नक्तञ्चराः । अम्महे, शोच्यदर्शनता नगर्याः–

एभिर्हि पातकिभिरध्वनि लङ्घिताया
व्याकीर्णशेखरसुमं लुलितालकायाः ।
उद्भ्रान्ततारकमुदश्रु भृशं रुदत्याः
स्वर्योषितः समदशामलका विभर्ति ॥ ४४ ॥

(नेपथ्ये)

अयि, सखीप्रणयपेशले चञ्चले, एतादृश्येव ते संकेताभिलाषिणी सखी भविष्यति दशकन्धरपरिभाविता, यद्यपापसंपर्कसंभावनं कैलासशरवणे गौरीपादमूलमेनां न सद्यः प्रापयिष्यसि ।

चञ्चला— (सभयकम्पम्) अयि, सुरपक्षपातिन्, महाभाग, कुत्र मे प्रियसखी रम्भा ? त्वमेवैतद्भणितुमर्हसि । शरणागतास्मि । परिरक्ष अबलाजनस्य मानम् ।

(नेपथ्ये)

अस्मिन्नेव यक्षोपवने चन्द्रप्रासादस्योपरिभूमिकायां वासकसज्जिका किल ते सखी तिष्ठति । त्वरस्व, त्वरस्व । मूढे, किं न पुरः पश्यसि चन्द्रप्रासादस्यैवाभिमुखमुपासीदन्तं दशमुखम् ।

चञ्चला– अम्महे, दशमुखः । हतविधे, किं परित्रास्यसे प्रियसखीम् ।

(इति ससंभ्रमोद्वेगं निष्क्रान्ता)

विष्कम्भः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(ततः प्रविशति दशाननः)

दशाननः—अहो तु खलु भोः, पुष्कलचन्द्रिकाभास्वरायामस्यां निशायां निरन्तरं पर्युत्सुकं मे मनो भवति । कः प्रतीकारः ।

प्रकाशिनि विधौ शरन्निर्मले व्योममार्गे
प्रसक्तहिमकर्कशे वाति धीरे समीरे ।
मनोहरखगध्वनौ पुष्पिते निष्कुटेऽस्मि-
न्नहो मदनशुष्मणामेधते दुर्विपाकः ॥ ४५ ॥

(विचिन्त्य सनिःश्वासम्)

योषिन्नाम मता पुंसः कापि मोदमयी कला ।
तया विनाऽसौ विकलः सर्वतो भद्रभागपि ॥ ४६ ॥

एताः खलु,

नितम्बैरम्बराक्रान्तैर्नासाग्रोन्नतिमत्कुचैः ।
दृप्यत्कन्दर्पकैरङ्गैर्मदयन्त्यङ्गना मनः ॥ ४७ ॥

कतिपयदिनैश्चादृष्टललितललनामुखाब्जोऽहम्—

एकान्ते न रमे न च पुनर्गोष्ठीगतो वा रमे
व्याक्षेपैर्न रमे न च पुनर्व्यग्रो भवन् वा रमे ।
संमर्दे विजयी न च रमे रम्यैर्न कैश्चिद्रमे
शून्यं मे निखिलं मनसिजे स्वार्थोपलम्भाक्षमे ॥ ४८ ॥

(आकाशे सोपालम्भम्)

अयि मदन, मदान्धचेतसा त्वं
विरहिणमेव कदर्थयन् बत स्याः ।
कथमुपकृतवान्निजार्थसिद्धे-
र्यदि न परार्दनमात्रतः कृतार्थः ॥ ४९ ॥

(मदनबाधां निरूप्य) सिमिसिमायन्ते मेऽङ्गानि । कोऽपि मोहः प्रभवतीव । कः प्रतीकारः ? न किमन्तरिक्षे काप्यप्सरा विचरति । नापि सौगन्धिकसरस्येकतमा स्नाति । अहो धिक्, प्रक्षोभ्यमाणादलकाभ्यन्तरात् यक्ष्योऽपि किल प्रनष्टाः । न तावत् कृतसङ्केता काप्यनस्मद्वृत्ता-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न्तवेदिनी कमितारमन्विष्यन्ती इहागच्छति। अहो, नूपुरशब्द इव। अयं रणता कलहंसेन वञ्चितोऽस्मि। कथं कामिनीकवरीवास इव। अहो, पारिजातसुगन्धिना समीरेण वञ्चितोऽस्मि। का मां कलमधुरं संकेत-कूजितेनाह्वयति। अये, न काऽप्यन्या। एषा खलु कल्पतरुशाखा-श्रयिणी शारिका मां विभ्रमयति। अथवा स्थानमिदं नूनं विडम्ब-नानां संकेतदोहदैकरसस्य मनोहरमनोरथोच्चयविहारस्य कामिजनस्य।

तथा हि—

मरालरणितैरिदं सरो ललितमर्मरं
कलप्रचुरभाषिताविमौ विहगदम्पती।
निबद्धकुसुमोच्चया धुनोति लतिका शिरः
सुगन्धिमरुदङ्कुरप्ररोहजटिला दिशः॥ ५०॥

(परिक्रम्य) एष चन्द्रप्रासादः। यावत्प्रविशामि। (दृष्ट्वा) अये, कथमियं चरणावकाशे परिचलन्ती शरीरच्छाया। (उद्वीक्ष्य) हन्त भोः,

कामलीलाललचापलतेवोन्नमितायता।
केयं वल्गति सौधाग्रादसितोत्पललोचना॥ ५१॥

(नेपथ्ये)

'अम्महे प्रियसखि, त्वरस्व, त्वरस्व। परित्रायस्व आत्मानम्।'

दशाननः—दिष्ट्या, दिष्ट्या मे प्रसीदति मदनः।

(नेपथ्ये)

ह हा धिगबलाजनः सपदि भोः परित्रायता-
मये गगनचारिणः क्षममुपेक्षितुं किं नु वः।

दशाननः—(मेघावरणं दृष्ट्वा) हा धिक, कथमावृणोति दृष्टिपथं झटित्यप-हृतज्योत्स्ना पयोदमाला। नैवमपि वञ्चयते दशाननः। अयि, सुगात्रि तिष्ठ, तिष्ठ—

हरामि मदनातुरः सुतनुमद्य भोगक्षमां
निरुध्य दिवि कौमुदीं जलधरान्धकारो यथा॥ ५२॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(इत्युत्पतन् कल्पशाखावघट्टितशिराः निपतति ।) हा धिक् । किमपध्वस्तोऽस्मि । अहह, प्रत्यस्तमितं मे नयनसौभाग्यम् ।

तटित्प्रख्या तन्वी विमलतरशीतांशुवदना
तमीश्यामापाङ्गा स्तनकलशतुङ्गाऽन्तरकृशा ।
विमुञ्चन्ती काञ्चीं क्षणमदित नेत्रोत्सवमत-
स्तमो जह्रे ज्योत्स्नां दृशमपि च मे तां च सुदृशम् ॥ ५३ ॥

(सकरुणम्) विलीयसे कथं चन्द्र मद्भीतो घनसंहतौ ।
अपेहि सकलङ्कस्त्वं निष्कलङ्कमुखीं वृणे ॥ ५४ ॥

(घनपटलापगमं निरूप्य) कष्टं भोः, अतीता मे हृदयचोरी ।

अलमलमनया प्रकटीकृतया घनपटल त्वं छिन्धि ज्योत्स्नाम् ।
व्यपगतवत्यां दयितायां मे शून्याः कक्षुभो विवृणोषि कुतः ॥ ५५ ॥

(पुनः स्मृत्वा सक्रोधम्) एष भङ्क्ष्यामि त्वां वृक्षाधम, ममापि नाम दशकन्धरस्य शिरस्ताडनेन समीहितविघ्नमुत्पादयसि । (दृष्ट्वा सावज्ञहासम्) अथवा भग्नस्कन्ध एवासौ वराकः मदुत्पतनरंहसा परिघट्टितः । (विमृश्य) अथवा, अभीष्टप्रतिपादकः खलु कल्पतरुः श्रूयते । तदमुमनुनयामि । किं राक्षसयाचितो न प्रदद्यात् । भवतु पश्यामि । भोः दिव्यानुभाव, पूरितार्थिमनोरथ, कल्पशाखिन् (श्रुत्वा सशङ्कम्) किं पुरुषशब्द इव । (दृष्ट्वा) अहो, महोदरादयः प्राप्ताः । हा धिक्, व्रीडाकरमुपक्रान्तं मया । कथं दशकण्ठः कामविडम्बनया तरुं याञ्चयोपस्थास्यति । शौर्यकल्पतरवः किं न मे भुजाः समुपस्थापयन्ति सहस्रमप्सरसाम् । तथा च,

यक्षी राक्षसी वा दानवी मानवी वा
किन्नर्यप्सरा वा सुन्दरी या त्रिलोक्याम् ।
सर्वान् दिक्पतीन् द्राग्जेष्यतः सा ममांशे
मत्ताः पक्ष्मलाक्ष्यो वीरचर्याफलं हि ॥ ५६ ॥

(पुरोऽवलोक्य) किमेते अलसकाः इयन्तं कालं व्यलम्बन्त । अथवा, यदेते अवरुद्धं पुरुषमानयन्ति तन्मन्ये केनचिद्यक्षोपरोधेन तत्र कारणेन भवितव्यमिति । (अभिमुखं परिक्रामति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ततः प्रविशन्ति अवरुद्धं यक्षं निर्भर्त्सयमानाः महोदरप्रहस्तविद्युज्जिह्वाः ।

महोदरः—अरे यक्ष, अद्य ते जातिनाम्नो वर्णपरिवृत्तिमुपदेक्ष्यामि ।

प्रहस्तः—अरे रे, अद्य कौबेर्या दिशो याम्यां दिशं सन्देशेन प्रेषयिष्यसे ।

विद्युज्जिह्वः- यक्ष, त्वामहं भक्षयाम्यञ्जसा ।

महोदरः-यावत्प्रत्ययं लम्बयाम्यम्बरे ।

प्रहस्तः—कीर्णं दारितम् ।

विद्युज्जिह्वः— ... खण्डितं पिण्डितम् ।

महोदरः—पिष्टं चूर्णितम् ।

प्रहस्तः—त्वां हनिष्यामि वा ।

यक्षपुरुषः—अथ न कोऽपि मे निरपराधिनोऽभयं प्रदास्यति ।

दशाननः—अयि भोः, अमात्याः किमेतत् ? किमुलूकवित्रासनार्थं सहस्रांशुः परिकरं बध्नाति ?

प्रहस्तः—देव, मैवम् । एष किल कपटवृत्तिः महेन्द्रव्यापारितश्चारः प्राप्तः यस्त्वस्मान् मिथ्याधीतसन्देशपठनेन अचिरात् अतिसन्दधे । अनेन चाद्य सुमहत् कर्म कृतं यन्मारीचोऽपि प्राणसंशयं गमितः ।

महोदरः—हा धिक् । वाचापि न मे उपचारं भणन्ति । किं महोदरांशपतितो लघुरुपोऽस्य दुर्यक्षस्य विमर्दोपसर्गः । अथ दिष्ट्या तुलोपधानवदाध्मातेऽस्मिन् कलेबरे प्रहारदुरासदान्यस्थीनि न भग्नानि ।

(सर्वे स्मयन्ते)

विद्युज्जिह्वः—(सोपहासम्) अयि महोदर नूनं प्रहारसहिष्णुत्वे मारीचमतिरिच्यसे । तादृशं गर्दभं त्वां मुखवर्णेनावगत्यैव दक्षोऽयं यक्षवटुः त्वदविनाकृतमेव विमानमुत्थापयामास ।

दशाननः—कथमेतत् । कीदृशोऽद्य मारीचः ? कुत्र तद्विमानम् ? किंनिमित्तकं युद्धम् ? अयि, महोदर, प्रिय वयस्य, मा ते विमाननशङ्काभूत् । इमे तिष्ठन्ति त्वत्संमाननकल्पशाखिनो मद्भुजाः । तद्विस्रब्धमनुपूर्वशो ब्रूहि वृत्तान्तम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

महोदरः—तदा किल इतः भवदनुमतः प्रस्थितः अनितरसहायापेक्षी कौवेरमन्तर्गृहं प्रविश्य,

चुलुकितशतशीधुकुम्भसारः
किमपि घटोद्भवसागराम्बुरीत्या ।
अवशमतिविसंस्थुले निशान्ते
स्खलितपदः क्वचिदाश्रयं हि शय्याम् ॥५७॥

दशाननः—(सस्मितम्) अहो, दुश्चरं वीरव्रतमनुष्ठितम् । ततस्ततः ।

विद्युज्जिह्वः—परस्ताद्वृत्तं कथमसौ जानाति । अनेन समाश्रितं निशान्तं तत् किल साक्षात् पुष्पकं विमानम् । एतदस्मासु न कोऽपि वेद। यावद्वयं पुष्पकमविदितेदमाकारं समन्तादन्वेषमाणाः क्लिश्यामहे तावदेष यक्षवटुः विमानमपनेतुकामः उपेत्योत्थापयामास ।

दशाननः— कथं महोदरगर्भमेवोत्थापयामास ?

विद्युज्जिह्वः— कुतो महोदरः । मदिरामदप्रमुग्धः स न किञ्चिद्वेद । एष यक्षोऽपि मन्ये सुकरनिग्रहमेनं मत्वा विचिन्त्य च निगूढानुष्ठेयतां निजनिदेशस्य विलुलितपुष्पशय्यं मांसमहोपलं न गणयामासेति ।

महोदरः—यदहं प्रमुग्धोऽभवम् उत प्रबुद्धः, अग्रे स्पष्टीभविष्यति ।

दशाननः— कथमासादितं समहोदरं पुष्पकं भवद्भिः ?

विद्युज्जिह्वः— स्वमुत्पतितं विमानं सद्योऽस्मद्दृष्टिगोचरीभूतम् । तदनूत्पत्य त्रयोऽपि वयं यावत् तत् यक्षाधिष्ठितं जानीमः, तावत् प्रबुद्धो महोदरोऽस्मान् शब्दापयति-'दिष्ट्या दिष्ट्या प्राप्ता यूयम् । इति ।

(सर्वे हसन्ति)

महोदरः-(सवैलक्ष्यम्) अयि विकत्थन, कियती ते आत्मसंभावना ? अथवा,

अहमत्र हेतुराद्यो मदृते ह्यभविष्यदन्यथा तदिदम् ।
इति जल्पकेषु विनदत्स्वनादरस्तन्निरस्क्रिया विदुषः ॥५८॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अग्रे गुरुलाघवं स्पष्टीभविष्यति । अद्य तावत् आतृप्ति-वैद्युतं ते जिह्वाज्योतिः परिस्फुरतु । क्षणरुचयः पुरा नश्यन्ति । (सहसा सामर्षोद्वेगम्) अथवा भवतोऽत्र समासः, "एकाकी चेन्महोदरो यक्ष-पशुनानेन समासादितः, तृणखादं खादितो भवेत्" इति । भवतु । एष ते प्रत्ययमापादयामि । अरे, रे, यक्षपशो, अद्य न भविष्यसि । (इति सपरिकरो यक्षं हन्तुं धावति । अन्ये बलाद्धारयन्ति ।)

दशाननः-(सस्मितम्) दृष्टस्ते विक्रमः । तिष्ठ तावत् । पुष्पकवृत्तान्तोऽनेन प्रसङ्गेन विच्छिन्नः किल ।

विद्युज्जिह्वः—ततः प्रवृत्ते युद्धे निर्जित एष यक्षो बद्धः । सारणप्रत्यवेक्षितो मारीचः प्रहारजर्जरो विश्रमार्थी कुबेरावसथे शेते तत्तु विमानं गगन-तले यक्षेनानेन यत्नावस्थापितं युद्धसंभ्रमिणा, तत्रैव तिष्ठति । अस्म-द्विधः तदुत्थापनोपसंहारादिकं न वेद । तत्र च यक्षवटुरेष नास्मान् प्रतिबोधयितुं संमनुते । श्रुत्वा देवः प्रमाणम् ।

महोदरः— ननु वदामि स्पष्टमग्रे भविष्यतीति ।

विद्युज्जिह्वः— किमु सुरामदो नाद्यापि तेऽपयाति । (यक्षं प्रति) अरे, किं प्रतिपत्स्यसेऽद्य स्वामिसन्निधौ ।

दशाननः – अरे यक्ष, त्वद्विमोचनं प्रतिशृणुमः । विमानप्रवृत्तिस्त-म्भनोपायम् अस्मद्धस्तगतं कुरु । नो चेत्, घोरं मृत्युमापत्स्यसे ।

यक्षः - राक्षसाधिपते, देवेतराननुशासनीयं तत् पुष्पकम् । तत्कृत-मायासेन । यूयं च स्वमहिम्नैव स्वैरं व्योममार्गलङ्घिनः । तत्कुतो युष्माकं वश्य एष पुष्पके निर्बन्धः ।

दशाननः – अहो प्रौढिर्व्याहारस्य । एष पृच्छन्तं दशकण्ठमपि तुलयति ।

प्रहस्तः – (सक्रोधम्) कस्त्वामुपदेष्टारं वव्रे । ध्वंसस्वेदानीम् । (इति गाढं प्रहरति । यक्षः मूर्च्छितः पतति ।)

महोदरः – अयि, महोदरशत्रो, मिथ्यादूत, ध्वंसस्व । (इति यक्षं प्रहर्तु-मिच्छति)

दशाननः – (तं निवारयन्) बालिश, अपेहि । प्रहस्त, कथमेष वराको हतस्त्वया ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विद्युज्जिह्वः—न तावन्मृत इति मन्ये ।

प्रहस्तः— जीवतु वा म्रियतां वा । किमनेन असाध्येन ।

महोदरः— न तु पुनः साम्प्रतमेष सम्भाषमाणानस्मान् वञ्चयित्वा प्रपलायिष्यते ।

दशाननः—प्रहस्त, का प्रतिपत्तिरिदानीम् ? रत्नमित्यादिष्टितं नः किल हस्ते अस्मैव भवति ।

विद्युज्जिह्वः— सर्पो भवतीति वक्तव्यम् । तदेतदन्यविप्रलम्भदैन्यं सुरतन्त्रकं बत नः । ते खलु निधयः आदातुं प्रसारिते करे सर्पीभूय सीत्कुर्वन्ति । असिना प्रहृतं चेत् न किञ्चिदुपलभ्यते । नूनमराक्षसगृह्यास्ते भवन्ति । स्थानादपि तेषां कुम्भाः न शक्यन्ते चलयितुम् । बहु प्रयत्यास्माभिर्भग्नमनोरथैः प्रतिनिवृत्तम् । तथापि सुरक्षितास्ते तिष्ठन्त्विति सारणस्य मया ज्ञापितम् ।

दशाननः—तिष्ठन्तु तत्रैव । पश्चाद्द्रक्ष्यामः । पुष्पकं च नाम माभूत् । बाहुमात्रसहायो न किमहं त्रैलोक्यमपि जेतुमलम् । तदुत्तिष्ठत । मारीचं च मार्ग एव सह्यवेदनतां पृष्ट्वा आपृच्छमानाः सद्यः सुरलोकमभियास्यामः इयन्तं कालं वृथा विलम्बो जातः ।

महोदरः— कदाचिन्महोदरवाहितं पुष्पकं चेच्चलति, तदा विमानेनैव गच्छामः किल ?

दशाननः—सखे, किमुपहासस्यावसरः ।

महोदरः—राजन्, नायमुपहासः । किं न मयोक्तं, स्पष्टमग्रे भविष्यतीति ?

दशाननः—(सस्पृहम्) सत्यं तन्मर्म त्वयाधिगतम् ? भण, महोदर, भण, प्रियवयस्योऽसि खलु मे ।

महोदरः—(विद्युज्जिह्वमपाङ्गयन्) मदिरामत्तः किं जानाति । भवतु । स्पष्टमग्रे भविष्यति ।

(सर्वे गगनोत्पतनं नाटयन्तो निष्क्रान्ताः ।)

इति तृतीयोऽङ्कः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अथ चतुर्थोऽङ्कः ।

(ततः प्रविशति नारदः)

नारदः—अहो मूर्खाणामेषां मन्त्रबलफल्गुता ।

बाहुबलमस्ति विपुलं साहसनिरतत्वमस्ति दुर्वारम् ।
अस्ति जिगीषा महती नय इति नास्त्येक एव गुणः ॥

अतस्तत्कालप्रचण्डोऽप्येषां विक्रमो नूनं फलकाले विसंवदिष्यति ।

ईर्ष्याकलुषं क्रोधक्षुभितं विद्वेषवह्निनिष्टप्तम् ।
चेतः प्रभविष्यति किं पौरुषमुपनेतुमच्युतां पदवीम् ॥

(विचिन्त्य सस्मितम्) किं च,

ईर्ष्यावृश्चिकदष्टानां मदनाविष्टचेतसाम् ।
क्रोधानलपरीतानां दुरवस्थैव शिक्षणम् ॥

(परिक्रामन्)

अयं स कठोरमुष्टिघातेन रक्षसा जीवितसंशयं प्रापितो यक्षेश्वरकिङ्करः । तावदेनं प्रत्यवपत्स्यसे ।

(ततः प्रविशति मूर्छितो भूपृष्ठशायी यक्षेश्वरकिङ्करः ।)

नारदः— (कमण्डलुजलेनाभ्युक्ष्य) अयि, यक्षेश्वरानुचर, उत्तिष्ठोत्तिष्ठ ।

यक्षः—(प्रतिबुद्ध्यमानः) अयि भोः, विमानराज, गं गं गगनाङ्गणरिङ्खण, हं हं हंसवाहित, झं झं पुष्पक, उत्तिष्ठोत्तिष्ठ स्वर्लोकगमनाय । (पुनः सपरामर्शम्) हा धिक्, किं राक्षसाः शृण्वन्ति । मया मन्त्रबीजमुद्घुष्टम् ।

नारदः—भद्र, प्रतिबुद्ध्यस्व । निरातङ्को भव ।

यक्षः—अहो, देवर्षिर्ना—भगवन् नमस्ते । शरणागतोऽस्मि ।

नारदः—भद्र, किं त्वत्तो मन्त्रबीजं महोदरः समुपलब्धवान् ।

किंकरः— तत्रैव राक्षससन्निधानमजानता मया प्रोत्थानुमाकारितो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विमानराजः । अथवा स मत्तः सुप्तोवाऽभवदिति तर्कयामि । प्रबुद्धोऽपि नाम किं श्रुतधरो महिषबुद्धिः कुणपाशनहतकः ।

नारदः– न न । परमर्मग्रहणेषु व्यग्रधियः पापिष्ठा एते । तन्न मे विस्रम्भः । भवतु, स्पष्टमग्रे भविष्यति ।

(नेपथ्ये)

अयि भो विमानराज, गं गं गगनाङ्गणरिङ्खण,

यक्षः– अहो, अत्याहितम् । विपरीतं मे फलितम् । कष्टं, मत्प्रमादेन स्वामिकार्यं विपद्यते । एवं किल जातपक्षो दन्दशूकः ।

नारदः– भद्र, अकातरो भव । एषोऽस्मि सुरकार्यप्रतिभूः । त्वं तावत्वा यक्षेश्वरं महेन्द्रं च ब्रूहि - यथा राक्षसाः स्वर्लोकं नाभियुञ्जेरन् यथा च यक्षेश्वरः अलकां सद्यः प्रतिपत्स्यते तथा व्याप्रियते नारद इति ।

यक्षः– अनेन भगवतः सङ्गरेण नूनमनुगृहीतः सुरपक्षः । (इति प्रतिष्ठते)

नारदः– अथवा इत इतस्तावत् ।

यक्षः– विधेयोऽस्मि भगवतः ।

नारदः– प्रथमं कैलासोपकण्ठे नन्दिदेवं विशेषतः प्राच्यद्वारे न प्रमदितव्यमिति प्रतिबोद्धय गच्छ ।

यक्षः– तथा । (इति निष्क्रान्तः)

नारदः– एते अन्तरिक्षस्थं विमानमध्यासीनाः प्रस्थास्यमाना इव लक्ष्यन्ते नैर्ऋताः । तदुचितोऽयमवसरः उपसर्तुम् । (इति निष्क्रान्तः) ।

॥ विष्कम्भः ॥

(ततः प्रविशन्ति विमानस्था दशाननप्रहस्तविद्युज्जिह्वमहोदराः ।)

महोदरः– किं नोक्तं मया स्पष्टमग्रे भविष्यतीति ।

दशाननः– सखे महोदर, त्वं मे बहिश्चराः प्राणाः । किमुच्यते त्वदायत्तो मदभ्युदय इति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विद्युज्जिह्वः — प्रचलतु विमानम्। पश्चाद्विकत्थनस्यावकाशो भविष्यति, उपलालनस्य वा। अर्धाधिगतमन्त्रस्यैव कियानाटोपः।

महोदरः— अद्य प्रलीयतामेषु शारदाभ्रेष्विव विद्युत् वैद्युती ते जिह्वा। किमर्धाधिगतमन्त्रो महोदरः? पश्य, पश्य, तावत् (इति सानुस्मरणं मन्त्रमावर्तयति।)

प्रहस्तः— (दृष्ट्वा) कथं प्रस्थास्यमानानामभिमुखीभवति ब्रह्मचारी?

दशाननः— अहो, ब्रह्मपुत्रो नारदः। आस्माकीन एवैषः।

प्रहस्तः— मायावी खल्वसौ पैशुन्यलम्पटो वटुः। अतस्तस्मिन्न स्वैरं विश्वसितव्यम्।

दशाननः— तुरीयोपायैकसाधनानामतिफल्गु बाधाकरं खल्वादिममुपायत्रयम्।

(ततः प्रविशति मेघपृष्ठस्थो नारदः।)

नारदः— विजयतां विजयतां, वीरलक्ष्मीसीमन्तसमलङ्करणं केकसीगर्भशुक्तिमुक्ताफलम्।

दशाननः— नमो ब्रह्मपुत्राय। आस्यतामत्र विमानभाग एव।

नारदः— तिष्ठतु, तिष्ठतु, समुदाचारः। अहमेनं मदाकारानुकारधवलं शारदाम्बुदमधितिष्ठाम्येव यथासुखम्।

दशाननः— भवतो दर्शनेन सुकृतिनमात्मानं मन्ये। विशेषतोऽस्मिन्नुपोद्घाते।

नारदः— आवैश्रवणविजयात् त्वदभिनन्दनाय त्वरमाणस्यापि निर्मक्षिकावसरालाभात् विलम्बो जातः।

प्रहस्तः— देवपक्षपातपरतन्त्रस्य इयतापि कालेन संमुखीभावो नूनमनुग्रह एव।

नारदः— अवितथमाह प्रहस्तः। सुरवृन्दोपसर्गेणैव ममैतावान् विलम्बः त्वामुपसर्तुम्।

दशाननः— कथमुपसर्ग इति?।

नारदः— शृणु तावद्विस्तरेण। आटविकोत्सारिता मक्षिका इव त्वया अलकाया वित्रासिता यक्षास्ताननुद्रुताश्च दिवौकसः "अहो महानुपप्लवः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

समुपस्थितः" इति क्रन्दन्तः प्रतीकारविधेर्मां शरणं गताः। मया तु, शौर्यादृते साम्प्रतं कोऽन्यः प्रतीकारः इति सन्तर्ज्य ते निवर्तिताः।

विद्युज्जिह्वः– उपपन्नमुक्तम्। धिक्, एते हि नाम निरन्तरोपभोगोपशान्त-शौर्योष्माणोऽभियोक्तव्या इति यत्सत्यं लज्जते मे हृदयम्।

महोदरः– यदि दिवौकसः पुरा पलायन्ते अस्माभिर्द्रागेव व्यग्रीभवितव्यं यथैते कल्पद्रुपीयूषादीन् अप्सरोगणांश्च नापवाहयिष्यन्ति। माभूद्य-क्षपुर्यामिवामरावत्यामपि नः फलविप्रलम्भः।

प्रहस्तः– अथास्मिन् क्षणे किमाचाराः सुराः।

नारदः– तदेव रहस्यं पुलस्त्यकुलप्रदीपाय निवेदयितुमुपागतोऽस्मि।

दशाननः– महता खल्वनेन प्रेमानुबन्धेन क्रीत एष जनो भगवता। अवहितोऽस्मि।

नारदः– तौ किल यक्षेश्वरसुरेश्वरौ सुराचार्येण सह सुचिरं संमन्त्र्य अन्ततः कैलासनाथः शरणमुपगन्तव्य इति निरचिन्वाताम्। इयता च कालेन मूर्तित्रयमहत्तरस्य भगवतः पादमूल एव भविष्यतः।

दशाननः– प्रियं नः। तेन हि कैलास एव स्वर्लोको विजेष्यते।

विद्युज्जिह्वः– स कैलासनाथोऽपि दिक्पालकेष्वन्यतम एव ननु।

महोदरः– प्रथमः कल्पः। दिगीशसामान्येनाभियोक्तव्यकोटिं सोऽप्य-वतरति।

नारदः– बाढम्। किं तु संहारप्रभविष्णुर्महादेवः केवलं दिगीश इति न क्षिप्रतुलनीयो भवताम्।

हासो यस्य पुरत्रयं ममदहद्धालाहलं यः पपौ
यच्छिष्यः किल कार्तवीर्यनृपतेश्चिच्छेद बाहून्बहून्।
कल्पान्ते कवलीकरोति कुपितो ब्रह्माण्डपिण्डं हि यो
देवः कस्य विलङ्घनीयमहिमा मूर्तित्रयग्रामणीः॥

महोदरः– न न। देव इत्येवास्माभिः स प्रार्थयिष्यते।

दशाननः– बाढमेवमेवैतत्। अस्य च महिमा नूनमस्माभिरपि बहुमान-यिष्यते यद्यसौ सुरपक्षपाती न स्यात्। संप्रति तु, ...

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः- अथ किम्। ज्ञायत एव भवतो विवक्षितम्। तस्य कथं सुरपक्षपातोऽपलपितुं शक्यते योऽचिराल्लङ्कातः परिभ्रंशितं भवता, कुबेरमभयप्रदानेन कैलासप्राग्भारमेवावासितवान्।

विद्युज्जिह्वः— अस्ति चैतत्। तदेतदवधर्तव्यं स्वामिना।

महोदरः— एवं स्वयमेवास्मासूपक्षिप्तवैरः कैलासपतिः।

प्रहस्तः— अत्रैष समासः। अस्मिन् विजिते विजितं हि नस्त्रैलोक्यं सदेवासुरमानुषम्।

नारदः— अस्मिन्नविजिते च सर्वलोकविजयोऽप्यप्रतिष्ठ एवेति बाढम्। परन्तु, कल्पान्तप्रलयप्रभविष्णुः कथमनादिपूरुषस्स जनिमतः कस्यचित् तिरस्कारार्हो भविष्यतीति परिप्लवं मे मनः।

विद्युज्जिह्वः - कथं जनिमतः कस्यचिदिति? निसर्गसिद्धाविशायिन्यः किमक्षयाः सिद्धयो नोपार्ज्यन्ते तपोमहिम्ना?

महोदरः - स कल्पान्तरप्रलयकृत्। अस्मत्स्वामी तु चिन्तितमात्र एव त्रैलोक्यप्रलयकृत्।

दशाननः - भवतु तावत्। वस्तुस्थितिः खलु भगवता प्रोक्ता। अनुभवपरतन्त्रं हि लौकिकदर्शनम्। योऽयमपूर्वोऽस्माकं विक्रमवृत्तान्तः कार्येणैव प्रत्ययनीयो भविष्यति।

नारदः - स खल्वप्रतिहतशक्तिर्महेश्वर इति पौनःपुन्ये ममायमनुरोधः।

विद्युज्जिह्वः - किं न जानन्ति भवन्तः कियतापि कालेन अनन्यविषयेण ईश्वरपदेनोपचर्यमाणं राक्षसेश्वरम्?

तथा हि—

मुख्याध्यक्षवृषेन्द्रसिंहघटनां यन्नाम्नि हीनार्थदां ?
मत्वा यं जगुरीश्वरं विगलितामर्षा विपक्षा अपि।
तस्याद्य त्रिजगत्कटाहजठरे जेतुर्युगान्तोदित-
क्रूराहर्पतिघस्मरो ज्वलति हि स्फारः प्रतापानलः॥ ॥ ५९ ॥

नारदः - अथ किम्। ज्वलत्येव। ज्वलिष्यति च विशेषेण। किन्तु कालकालस्स गिरिश इत्येतदनुस्मारणे प्रवर्तयति मां सगोत्रतास्नेहो भवति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विद्युज्जिह्वः – कालकालस्यापि कालो भवत्येव । स्वल्पदर्शी खलु जनः तेजोविशेषाणां पर्याप्ततामवगच्छति । असीममुद्रा ह्युत्कर्षनिश्रेणिः ।

उच्चैः स्तुतिर्महिमशालिनि तावदास्तां
नासीद्भविष्यति समोऽस्य भवत्यपीति ।
कालः कियान् कियदिदं भुवनं प्रभावः
किंदृग्विधेस्तदतिशायिगुणो न भूयात् ॥ ६० ॥

दशाननः– अदूरवर्तिन एव वयं गिरिशशिखरस्येति मन्ये ।

नारदः – बाढम् । अस्मात् कैलासप्राग्भारात् पुष्पकेणैवोर्ध्वं गच्छतां वः धवलोष्णीष इव शैलराजस्य शिलीभूतहिमसमावेष्टितः शङ्करावासभूतः शिखरो गोचरीभविष्यति । साधयामः पुनर्दर्शनाय । वर्धतां चानुत्तमबाहुनाधिगमसूचितो भवतो दशदिशासाम्राज्यलाभाभ्युदयः ।

(इति निष्क्रान्तः ।)

विद्युज्जिह्वः– साधु भोः, लङ्केश्वरविद्वेषिणः साधु ।

कुसुमायुधदाहमात्रतो मनुते यः स्वममित्रघातिनम् ।
स भवेच्छरणं विपत्सु चेद्द्युसदां शौर्यमहो भयावहम् ॥ ६१ ॥

दशाननः– महोदर, प्रवर्तय विमानं कैलासशिखरं प्रति । एकाभियोगेनानेकफलनिपातनमापादयामः । (स्वगतं साशङ्कम्) कथमकुशलार्था सरस्वती मे निस्सरति ।

प्रहस्तः – (स्वगतम्) कथं स्वामिना प्रस्खलितार्था वागुदीर्यते ।

महोदरः– मम त्वेवं प्रतिभाति । वीतवीरपुरुषमप्सरोमात्रशेषं किं नाकमेवाद्य न गाहामहे इति । किमनेन पिशाचावेष्टितेन कैलासशिखरेण अश्लाघ्यप्रातिपक्ष्येण वा पुराणभिक्षुकेण शम्भुना ? अथवा देवादेशः प्रमाणम् ।

(मन्त्रमावर्त्य विमानं प्रवर्तयति ।)

पश्यतु देवः पश्यतु प्रक्रान्तगगनाङ्गणरिङ्खणं विमानराजम् ।

दशाननः— (सहर्षम्) साधु, वयस्य, साधु

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कलक्वणितकिङ्किणीकलितकेतुवेधस्फुर-
त्तटिद्वलयभास्वरध्वजपटीदशालेपनम् ।
इदं किल घनावलीपरिवहानिलोदाहृत-
स्वसौरभवृतं पुरो वियति पुष्पकं वल्गति ॥ ६२ ॥

अपि च,

दूरमुत्पतति पुष्पके रथे पुष्पशाखिपरिकर्षिणाऽञ्जसा।
मारुतेन विनिकीर्यते पुरः कौसुमी बहलवृष्टिरध्वनि ॥ ६३ ॥

विद्युज्जिह्वः— स्थाने खलु वैहायसगतिं मोक्षमाहुः केचन वैकल्पिकाः ।
यतः—

निरवधिगगनावकाशवेग-
प्लवनभवो मम चेतसि प्रमोदः ।
निरवधिरनिरूपितस्वरूपो
गगनवदेव विभुः प्रकाशशाली ॥ ६४ ॥

दशाननः— अहो चक्षुर्महोत्सवाकरता शैलसंविधानपरिस्फुरच्चन्द्रिकाया
निशीथिन्याः। अत्र खलु रजनिकरमयूखाः—

तुहिनपटलपातक्लिष्टसंदिग्धरूपा
नवजलदकणान्तर्वेधचित्रप्रभाढ्याः ।
वनभुवि चलपर्णच्छाययान्दोलिताभा
विदधति गुडिकान्तःपारदालोललीलाम् ॥ ६५ ॥

विद्युज्जिह्वः— महाराज, मम तु मते,

तरुदलविवरैर्गलिता भूमौ
च्छायापिण्डाननु विलुठन्तः ।
निशिचरबन्दीसाञ्जननयन-
च्युतय इवामी हिमकरकिरणाः ॥ ६६ ॥

दशाननः— सखे, विद्युज्जिह्व, पश्य, पश्य, महोदरवाह्यमानमे-
तद्विमानं पर्यायेणावगाहते तिरश्चीनं छायापथं तदुपस्कारकृततट-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

बन्धामिव च ज्योत्स्नापूरसरणिम् । कुतः खल्वीदृशी विभक्तसरणिरुभयप्रवृत्तिः ? (पृष्ठतो निर्वर्ण्य) अहो, महाभोगतया उत्तुङ्गानेकशृङ्गतया च वैचित्र्यप्रदर्शकता हिमवतः । तथा हि—

असङ्कीर्णाकारं समुदितशिरःपङ्क्तिविवरो-
ल्लसज्ज्योत्स्नापूरव्यतिकरवशादेष गगने ।
विनिर्भिन्नच्छायाप्रसरपरिपाटिः कलयते
प्रतीचीकालिन्दीत्रिपथगमनासङ्गमशतम् ॥ ६७ ॥

प्रहस्तः— देव वाङ्मनसयोरगोचरे किलास्य विमानराजस्य गगनोल्लङ्घनरभसः । तथा हि, अस्य वेगमहिम्ना—

क्षणं भित्तिप्रायो गिरिरुभयपार्श्वेऽप्युपचितः
स्फुरद्रेखाशृङ्गोन्नतिरथ तलाभोगविपुलः ।
क्वचिद्रावोच्छ्रायः क्वचन निविडानोकहचितः
पुरा मेघश्यामः पुनरपि तुषारस्रुतिसितः ॥ ६८ ॥

महोदरः— राजन्, नूनं मेघपथमुल्लङ्घ्य हिमलक्षणामुपरि सीमानमेव प्राप्ता वयम् । किं न पश्यति भवान्—

कलभा इव सलिलमुचो मध्यमशृङ्गेषु विहरन्ति ।
ऐरावता इवाग्रयेष्वमी निषण्णा हिमोपलोत्सेधाः ॥ ६९ ॥

दशाननः— अद्य हिमवतो महिमलेशपरिचयादद्भुतोत्फुल्लं वर्तते मे चेतः ।

यतः—

निर्झरशीकरविसरैर्जलदपृषत्कैस्तुषारसंबाधैः ।
अस्योपर्युपरिभवैरेकोत्पाते वयं समुपजुष्टाः ॥ ७० ॥

महोदरः— राजन्, किमुच्यते हिमवतः प्रभावगरिमा । एवमतिमनोवेगमुत्पतन्तोऽपि वयं न खलु चिरेणासादयामः परमशीर्षमेतस्य ।

तथा हि पश्य,

उत्पत्य चोत्पत्य समुज्जिहीते प्रतिक्षणं पुष्पकमूर्ध्वमूर्ध्वम् ।
शृङ्गाणि शैलोऽपि पुरःपुरो नः प्रस्पर्धयेव प्रकटीकरोति ॥ ७१ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दशाननः— महोदर, अद्य नूनं तुषारशिखरस्य नेदीयसि वर्त्मन्येव वर्तामहे। पश्य,

अग्रे घनीभवदमन्दझरीतलोढ-
प्रालेयगण्डदृषदन्वयविम्बितत्वात्।
आरोहि पुष्पकमपीदमधःप्रपात-
निर्घातसन्ततिमिवानुभवत्यकाण्डे॥ ७२॥

प्रहस्तः- (स्वगतम्) प्रतिहतममङ्गलम्। शठनायिकेव देवस्याद्य वाणी प्रायो भवत्यविश्वसनीयप्रकृतार्था।

विद्युज्जिह्वः— देव, कः सन्देहः। ननु प्राप्ता एव वयं हरावासस्थानं कैलासगिरेरग्रिमं शिखरम्। किन्न पश्यत्यदूर एव भवान् आकारव्यक्तिम्।

तथा हि—

आलिप्तभस्मपुनरुक्तवपुःप्रकाशा
आपिञ्जरायतविकीर्णकपर्दभाराः।
एते हरानुचरभूतगणा नु नाम
शैवाललक्ष्मतुहिनोपलदर्शनीयाः॥ ७३॥

दशाननः— महोदर, तेन हि मन्दीक्रियतां विमानवेगः। समन्तान्नयनकौतुकं निर्विशामः। अद्य चास्य कैलासशृङ्गस्योपरि विमानराजः —

स्तिमितविततपक्षः किञ्चिदावर्जितांसः
शफरचलनलक्ष्मस्वप्रमत्तोग्रचक्षुः।
शरदि तनिमभाजः पल्वलस्योपरिष्टात्
खगपतिरिव चक्रावर्तरीतिं विधत्ताम्॥ ७४॥

महोदरः— (शनैः शनैर्विमानवेगं नियच्छति)

नेपथ्ये

अयि भोः, करङ्क-कीकस-करोटिकाय-रुद्रट-भीमट-विकट-दंष्ट्रिलास्थिल-कराल-कङ्कालमुखाः प्रमथनाथाः, एवं भृङ्गिरिटिर्वः समाज्ञापयति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अद्य किमपि चिरादनिर्भिन्नसमाधिर्निर्व्यापारो देवः । तदनया दिशा अलकावस्कन्दिनो नक्तञ्चराः यथा न परिस्पन्दन्ते तथा भवद्भिरुदायुधैर्व्यग्रीभवितव्यमिति ।

प्रहस्तः—कथं निर्व्यापारः शङ्कर इति ।

महोदरः— किं युद्धकातरतया ध्यानव्याजमङ्गीकरोति ।

विद्युज्जिह्वः— अद्यास्यानुचरानितस्ततो धावतो निष्पिष्य तद्रुधिरधाराभिः समाधिस्थममिषिञ्चामः ।

दशाननः— भवत्वेवं तावदुद्घोषयामः । भो, भो, भूतप्रेतपिशाचाः, गिरिशपार्षदापशदाः, निवेदयत दशाननस्य प्रधर्षणां युष्मत्स्वामिने । अद्यालकाप्रमाथदुर्ललितभुजविंशतिरुपागतोऽहं रणातिथिरिति । कथमेतेऽपि किमप्यप्रतिपद्य शनैर्दृष्टिपथान्नश्यन्ति । अहो तु भोः, यत्सत्यं विस्मितोऽस्मि । अपि नाम तत्त्वतो वयं कैलासपरिसर एव वर्तामहे । सर्वेश्वरत्रुवस्य निलयेऽस्मिन् द्वार एव शत्रुभिरवस्कन्दिते दौवारिकोऽपि दुर्लभो भवति । सर्वोऽप्युदासीन इव निवर्तते परिजनः । न कापि गुप्तिः क्रियते । कष्टं तपोवनप्रायमिदं स्थानम् । दूरात् शृणुमो वैभवविरुदावलिम् । आरादरातिप्रातिमुख्यमपि कातरतया विवर्जयन्तः प्रलीयन्ते । अहो तूलप्रायं जगदखिलं भुजशालिनाम् । तत्किमद्य करवाणि सङ्कर्पदोहदकण्डूलदोर्मण्डलः ।

विचित्य गिरिकन्दराण्यमुमुपोढमिथ्यातपः-
समाधिमुपहन्मि किं सपदि दिक्तटीबन्धनम् ।
हठादुपरि पातयाम्युत किमट्टहासारवै-
रमुं किमुत चूर्णयाम्यचलमेव सत्र्यम्बकम् ॥ ७५ ॥

नेपथ्ये

विजये, विजये, हा धिक्, शापतिरस्कृतामपि तपस्विनीं शून्यहृदया न स्मरामि ।

दशाननादयः— (शृण्वन्ति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुनर्नेपथ्ये

भट्टिनि, इमे स्वः प्रदोषसन्ध्याशिवरात्री ।
चेट्यौ, कुत्र वां कथाविच्छेदो जातः ।
भट्टिनि, घोरतमानां निशाचराणामद्यादूरादारवः श्रूयते । तदन्तःपुरमुपगम्यैव कथितशेषं श्रोतुमर्हसि ।

दशाननः— (सविस्मयम्) कुतोऽप्यालापः ।

(सर्वे सावधानं शृण्वन्तः परितः पश्यन्ति ।)

पुनर्नेपथ्ये

अहो धिक्, अद्य खलु प्रपञ्चशरण्यः पुत्रदारानुपेक्षते । स्वैनैवात्मा रक्षितव्योऽधुनाऽस्माकं संवृत्तः । तदेतम् । नन्दिनं द्रक्ष्यामः ।

दशाननः— स्त्रीजनस्येव श्रोत्रसुधास्यन्दी मधुरालापः । (दृष्ट्वा) महोदर, किञ्चिद्दक्षिणतः बालारुणप्रकाशालिप्तहरिदन्तरस्यास्य काञ्चनशरवणस्य दिशा विमानमुद्योजय । यत्रैताः निष्टप्तहेमगौराङ्ग्यः कलालापपेशलाः मत्तकाशिन्यः परिवर्तन्ते । अहो, चक्षुष्मत्तायाः साफल्यम् ।

महोदरः— अयि विमानराज, किञ्चिद्दक्षिणतः काञ्चनशरवणस्यास्यैव सद्यः सन्निहितो भव ।

नेपथ्ये

अयि विमानराज, शापितोऽसि जगन्मातुः पादकमलाभ्यां यदीतः पदमपि चलसि ।

दशाननः— अये क एष विमानं स्तम्भयति । महोदर, वाह्यतां वाह्यतां विमानराजः ।

विद्युज्जिह्वः— अये, कोऽद्य मे जिह्वाज्योतिषि शलभीभविष्यति ।

महोदरः— अहो स्तब्धं विमानम् । अयि, विमानराज (इत्यादिमन्त्रमावर्तयति) हा धिक्, रूढमूलमिव स्थावरं संवृत्तम् । वाताविद्धः केतुपटोऽप्यस्य न मनाक् चञ्चति । कुतोऽद्य विमानपरिस्पन्दाशंसालवोऽपि नः । नूनं यक्षैः कृतवैराणामस्माकं यक्षिणी मार्गरोधिनी संवृत्तेति तर्कयामि ।

दशाननः— आः कुतोऽस्मासु यक्षिणी वा कश्चिदन्योऽपि वा प्रभविष्यति ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विद्युज्जिह्वः – महोदर, महोदर, चोद्यतां विमानराजो भूयो मन्त्रानुस्मरणेन एतत् त्रिलोकविजयिनो दशकन्धरस्य शासनमिति ।

महोदरः— महाभाग, प्रगल्भवाचाल, अद्य भवानपि मत्तो विदितमन्त्र एव ननु । तद्गृह्यन्तां भवतैव काममेते हंसमुखप्रग्रहाः । एष निवृत्तनियोगो भवामि ।

विद्युज्जिह्वः— धिङ्मूर्ख, अकल्य, ...

दशाननः— आः एष गोचरीभूतो विमानस्तम्भनदुर्विदग्धः पातकी। अहो दर्शनानुरूपं चेष्टितमस्य सर्वाङ्गकुटिलस्य ।

(इत्यट्टहासं मुञ्चति ।)

ततः प्रविशति समुद्धृतशूलः क्रुद्धो भगवान् नन्दी ।

नन्दी— मा तावद्भोः मन्दमते ! सत्वरं निवर्तस्व अस्मात् विपाकदारुणात् चापलप्रसङ्गात् यदि जीवन्तमात्मानमिच्छसि ।

दशाननः— (सावज्ञहासम्) यदि जीवन्तमात्मानमिच्छामि ? अरे रे, विमानस्तम्भनमिथ्यापौरुष, वामचेष्टित, वामन, न खलु जानासि त्वत्पुरःस्थं लङ्केश्वरम् ।

नन्दी— अरे, दुर्मते, जानामि त्वां स्वैर्दुराचारैर्विपन्नप्रायाभ्युदयम् । पश्य, मूढ, पश्य,

शिष्टान् हंसि निरङ्कुशो मुनिगणानालोड्यस्याश्रमा-
नुद्यानानि मिनत्सि नाकिसदसां वायुः प्रवृद्धो यथा ।
वज्रक्रूरनिपातदोर्दर्शयुगप्रक्षुब्धदेवद्विजान्
लोकानाकुलयस्यहो बत हतः स्वैरेव पापैरसि ॥ ७६ ॥

दशाननः— अयं नः प्रशस्तिपाठः । न तु नाम निन्दा ।

नन्दी— अरे पापिष्ठ, आत्मश्लाघादुर्विदग्ध, राक्षसपशो, साधुजनाभिशापोपदग्धः प्रागेव त्वमिति विरमामि तावत् त्वयि शापनिपातनपौनरुक्त्यात् । तद्विरम, विरमास्मादश्रेयोनिधानात् पूज्यव्यतिक्रमचापलात् ।

अयं भगवतः शैलो देवदेवस्य शूलिनः ।
सर्ववैमानिकालङ्घ्यः प्रादक्षिण्यक्रमादृते ॥ ७७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तत्प्रतिपद्यस्व हितमात्मनः यावन्न ते चापलफलं परिणामयिष्यते।

दशाननः— अयमपरः शौर्यभ्रष्टोऽस्मासु हितोपदेशव्यसनी। अहो, कतिविधाः क्षीणसत्वानां कातर्यनिगूहनोपायाः। अरे, दिक्पालकापसदपादोपजीविन्, दौवारिकहतक, किमु शिक्षयसि दशाननस्य विनयप्रवृत्तिं विपक्षेऽपि। धिक् त्वां, त्वत्स्वामिनं च।

दिक्कोणान्निलयनकानि संश्रयन्तो
यं देवाश्चकितमपाङ्गयन्ति यान्तम्।
तस्याद्य प्रतिभटनाशदुःस्थदोष्णः
क्षुद्रस्त्वं क नु भविता तव प्रभुर्वा॥ ७८॥

नन्दी— (कर्णौ पिधाय) शान्तं पापम्। न हि श्रोतुमर्हा ईश्वरापवादाः। (सक्रोधम्) अपेहि रे, पौलस्त्यकुलकलङ्क अपेहि मे दृष्टिपथात्, यावन्न त्वां दृशैव धक्ष्यामि।

दशाननः— (सामर्षाटोपम्) अरे रे, वृथाशूलधर, जर्जरानड्वन्, किमिति प्रगल्भसे। एष शृङ्गे ते समुत्पाटयामि। (इत्यभिपतति)

नन्दी— अरे, दुर्वार, भ्रष्टो भव। (इति शपति)

(दशाननः अन्तरिक्षात् अधः पतति)

विद्युज्जिह्वादयः— हा हा महाराज, (इत्यनुपतन्ति)

(दिवः पुष्पवृष्टिः पतति। दुन्दुभयो नदन्ति)

नेपथ्ये

जयति भगवान् द्वितीयो हर इव नन्दी सुरान्वयानन्दी।
यद्वाग्वज्रनिपातात् गण्डोपलवत् पतत्यसौ पापः।

नन्दी— ईषत्खल्विदमस्य महापातकिनः। अनन्तरकरणीये तु देवः प्रमाणम्। न खल्वात्मना किमप्यस्मिन्नात्ययिकमापादयितुमिच्छामि। यतश्च विशेषतस्तोषितमहेश्वरा मूर्खस्यास्य पूर्वपुरुषाः येषु देवयोरास्मीयत्वप्रतिपत्तिरासीत्। विरलावग्रहा खल्वनादिजगत्पित्रोर्दयावृष्टिवैखरी भूतसामान्ये। तदद्य वृत्तान्तनिवेदनमात्रेणास्मन्नियोगो निवर्तताम्। यावद्देवस्य योगनिद्राप्रबोधक्षणं प्रतिपालयामि। अथ वा नचिरादेव नूनमेष दुर्वृत्तः प्रतिबोधयिष्यति देवं नूतनेन केनचिदुपम-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दीपोद्घातेन । आत्यन्तिकव्यापत्तेरर्वाक् कुतो नु नाम विशृङ्खलानां खलानामपथादुपरतिर्घटते । भवितव्यता खलु बलवती ।

नेपथ्ये

भगवन्, शङ्करौपवाह्य, अवसरप्राप्तमनुष्ठेयमधिकृत्य भवता मन्त्रयितुकामस्सुरपुरोधाः सपुरन्दरः प्राप्तः ।

नन्दी— के वयं मन्त्रेषु । दैवतन्त्रके जगति कुतो वा मन्त्रस्य परिणतिकल्पनाकल्पता । भवतु नाम । गृहागतौ प्रवरातिथी सम्भावयामि ।

(इति निष्क्रान्तः)

इति श्रीमहालिङ्गकविविरचिते उद्गातृदशाननाभ्ये नाटके चतुर्थोऽङ्कः ।

अथ पञ्चमोऽङ्कः ॥

ततः प्रविशति व्योमविमानस्थः पुरन्दरः वाचस्पतिना सह ।

पुरन्दरः— एता नन्दीश्वरक्षिप्रदर्शनोद्योगिनां हि नः ।
चतुर्दशसमायन्ते चतुर्दश विनाडिकाः ॥ ७९ ॥

वाचस्पतिः— न केवलमस्माकम् । पश्यतु भवानधस्तात् ।

अस्यापि नन्दिनः क्रोधादपध्वस्तस्य रक्षसः ।
चतुर्दशसमायन्ते चतुर्दश विनाडिकाः ॥ ८० ॥

अथवा कृतं कालगणनया । कालकालस्य खलु सन्निधौ वर्तामहे ।

वत्सरा नाडिका एव चतुर्दश चतुर्दश ।
तावुभौ व्यत्ययेनापि कालरूपी किलेश्वरः ॥ ८१ ॥

पुरन्दरः— अयमुपस्थितो नन्दी—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रविश्य

नन्दिकेश्वरः— स्वागतं प्रवरातिथिभ्याम ।

पुरन्दरः— भोः शैलादे,

त्रैलोक्योद्भटभारमूर्तिमिव तं क्ष्वेडं पुरा यः पपौ
देवो मूर्तिमती दया दिविषदां त्राणव्रते दीक्षितः ।
क्वासौ सम्प्रति नः किमस्त्यवसरः कस्मान्न विज्ञाप्यते
विश्वग्रासविसारिविंशतिभुजादुर्लङ्घ्यदर्पो रिपुः ॥ ८२ ॥

नन्दी— सोऽस्य दर्प एवाचिरात् प्रतीहारीभवितुमर्हति । यतः,

तेजोभङ्गमवाप्तानां निकृतिः परमा गतिः ।
विशेषतो दुर्मदानामीदृशां वैरकाङ्क्षिणाम् ॥ ८३ ॥

वाचस्पतिः— सुष्टु भववाऽयं विनयातिक्रमान्निवारितः ।

नन्दी — किं नदीरयो रोध पातेन निवार्यते ।

वाचस्पतिः— अवितथम् । कुवेरवृत्तान्तं श्रुत्वा परमेश्वर एवात्र प्रति विधातुं पारयिष्यति ।

पुरन्दरः— यथा नात्रशेषो दशवदनकथायाः तथा प्रतिविधाय परमेश्वरोऽनुगृह्णातु सुरानिति प्रार्थनयान्तर्गतया उपस्थितौस्वः भगवतः पादमूलम् ।

नन्दी— अथ यक्षेश्वरः किं कल्यशरीरः ।

वाचस्पतिः— स नन्दनलताकुञ्जे सेवितः स्वर्वधूगणैः ।
शेते नासत्यनिर्व्यूढव्रणसंरोपणक्रियः ॥ ८४ ॥

नन्दी — धिक् कष्टम ।

पुरन्दरः— (अधोऽवलोक्य) हन्त भोः, किमेष दशकन्धरो व्यवस्यति ?

विलुठ्य पुनरुत्थितः सपदि संप्रधाव्याभितः
परीक्ष्य गिरिमूलमर्पितभुजस्तदभ्यन्तरे ।
विनम्रतनुरुच्छिरा विकटमेकजानुस्थिति-
र्निरुध्य पवनं हृदि द्रुतमसौ समुद्युज्यसे ॥ ८५ ॥

वाचस्पतिः— समुद्धरिष्यति कैलासं मूलादिव ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुरन्दरः— (प्रहस्य) मूढः खल्वसौ ।

नन्दी— दिवस्पते, मैवम् । नास्ति दुष्करं रक्षःप्रवेकस्य ।

वाचस्पतिः— सत्यमाह भवान् । यतः—

अङ्गुलिखनित्रशतकक्षुण्णप्रत्यन्तमेष कैलासम् ।
मुकुटमिव भेत्तुमिच्छति नगाधिराजस्य सामर्षः ॥ ८६ ॥

पुरन्दरः— अहो भीषणमुपक्रान्तं रक्षसा ।

नन्दी— चलतीवाचलः (इति स्खलनं नाटयति)

पुरन्दरः— खमुत्पततु भवान् ।

नन्दी— न क्षममिदं मे दौवारिकस्य । तत् प्रत्यवेक्षिष्ये कीदृक् किमिति कैलासे । (इति रभसेन निष्क्रान्तः)

पुरन्दरः— अहो प्रक्षोभः सार्वत्रिकः कैलासे,

लुठन्ति गणशो गणा विलुठितैः सह ग्रावभि-
र्विरुज्य फडिति द्रुमा दशशतं पतन्ति क्षणात् ।
महानुदयते रवः क्षुभितभूतजातव्यथा-
भयोदयनिरङ्कुशः सपदि कम्पमाने गिरौ ॥ ८७ ॥

वाचस्पतिः—

केचित्पार्षदपुङ्गवाः कृतधियः सद्यः श्रयन्तेऽम्बरं
गाढाश्लेषपरायणाः स्वदयिता धृत्वाऽवलग्ने दृढम् ।
सिद्धाः किन्नरयक्षपन्नगगणा विद्याधराश्चेतरे
सस्त्रीकाः खमुपेत्य विस्मयवशात् पश्यन्ति दूरे स्थिताः ॥ ८८ ॥

पुरन्दरः— किमिदानीं समुद्रमथनावर्तित इव मन्दरः परिभ्रमति श्वेतशैलः ।

वाचस्पतिः— मन्ये हठात्तोलयतो दशवदनस्य विंशतिभुजेष्वप्यप्राप्य विश्रमं विसंष्ठुलः परिभ्रमति शैल इति ।

तेन चासौ—

व्यस्तैर्वनस्पतिशतैरपविद्धबाहु-
रार्द्रझराम्बुभिरवाप्तदुकूलशोभः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सध्वानगह्वरमुखैरभिनीतगीतिः
प्रस्फोटशब्दकृतताल इव प्रनृत्तः ॥ ८९ ॥

पुरन्दरः— अहो बाहुपराक्रमो दुर्वृत्तस्य। न जाने किं प्रतिपत्स्यते कैलासनाथ इति। दिष्ट्या स्वैरपचारैरासन्नविनिपातो दुरात्मा।

वाचस्पतिः— (दृष्ट्वा साश्चर्यम्) अथेदानीं सहसा प्रकृतिस्थः शैलकूटः।

पुरन्दरः— एवमेतत्। अमी किल—

पुनर्लब्धस्वास्थ्याः सरभसमथोत्थाय हि गणा
विचिन्वन्तो भूषावसनमुकुटादीनि परितः।
भ्रमन्ति स्वैर्गात्रैरलघुदृषदुत्पिष्टविकलै-
र्वहन्तो धातूनां विविधकृतवैवर्ण्यरचनाः ॥ ९० ॥

वाचस्पतिः— अमी पुनरन्ये,

दिष्ट्येति संश्लिष्य वधूसुतादीन्
नन्दन्ति केचिन्नयनैः सबाष्पैः।

(दृष्ट्वा सहासम्)

असौ गजास्यः कुतुकाय कायं
विलोठयत्यद्रितटीष्वभीक्ष्णम् ॥ ९१ ॥

(सविमर्शम्) तत्कथमेतत्?

अधरोत्तरमापाद्य विपर्यासं च वा बहु।
क्षणेन मदनिर्मुक्त इव शैलो व्यवस्थितः ॥ ९२ ॥

(नेपथ्ये महान् विरावः)

वाचस्पतिः— अयं व्यथमानः फीट्करोति पौलस्त्यहतकः। दिष्ट्या अनुदासीनः परमेश्वरः।

पुरन्दरः— नूनं महादेवसङ्कल्पेन स्थिरीभूतः कैलासः पिनष्टि पापिष्ठम्।

वाचस्पतिः— अहो दुःश्रवो रवः।

दशभ्यो वक्त्रेभ्यः स्फुटघटिततारस्वरमसौ
हठादुद्यन् कर्णौ व्यथयति पविस्फोटविकटः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रतिध्वानैः पीनैर्मुखरयति दिक्कुञ्जकुहरा-
ण्यचर्याः साश्चर्या भयपरियताः प्राणिनिवहाः ॥ ९३ ॥

पुरन्दरः— दिष्ट्या शत्रोरार्तस्वरं शृणुवः। गुरो, बद्धः पापिष्ठः। भग्नभुजश्च प्रशान्तो भविष्यति। तदन्यं भगवतः सेवावकाशमन्विष्यावः। क्षीयमाणमिवाशरपशुं पश्यामि। यत्तर्जनगर्जनानि मुक्त्वा तारप्ररोदः संवृत्तः।

वाचस्पतिः— भोः,

कारुण्येन च चण्डिमा दुःश्रवो रक्षसो रवः।
मनो व्यथयति क्षिप्रं रिपोरपि रुजोत्कटः ॥ ९४ ॥

पुरन्दरः— भवतु। यक्षेश्वरः प्रतिनन्दिष्यति वार्तामिमाम्। साम्प्रतमेव पुनरावासयितव्या अलका। किं निवर्तावहे।

वाचस्पतिः— एष भृङ्गिरिटिरायाति।

(ततः प्रविशति भृङ्गिरिटिः)

भृङ्गिरिटिः— मत्प्रतीक्षाविवैतौ वासववाचस्पती। (इत्युपसर्पति)

वाचस्पतिः— भद्रं भोः, भृङ्गिरिटे, कोऽन्वसौ वृत्तान्तः।

भृङ्गिरिटिः—

पादाङ्गुष्ठं नमयति विभुः पीडितस्तेन शैलः
पापात्मानं दशमुखमधःप्रोतबाहुं पिनष्टि।
सोऽयं रौति प्रणदति रटत्यञ्जसा फीट्करोति
स्वैरेवास्त्रैरुपचितसरश्चण्डमण्डूकलक्ष्यः ॥ ९५ ॥

पुरन्दरः— सुष्ठु खलु व्यपनीताऽस्य रक्षसः भुजदर्पकण्डूः महाग्रावोदयघर्षणेन।

भृङ्गिरिटिः— बाढम्। अद्य खल्वस्य बलवीर्यदृप्ता भुजा निष्पेषयन्त्रग्रथितानामिक्षुकाण्डानां दशामनुभवन्ति।

वाचस्पतिः— यावदशिथिलं भगवतः पादाङ्गुष्ठो गिरिपृष्ठे निष्ठितः तावत् अस्मादृशानां स्वस्तिमती स्थितिः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुरन्दरः — भृङ्गिरिटे, कीदृशो भगवतः सेवावकाशः ।

भृङ्गिरिटिः — (स्वगतम्) न खलु देवयोर्मानकलहमन्तरेण किमपि प्रजल्पितव्यम् । एवं भवतु । (प्रकाशम्) रक्षःप्रक्षोभकातरां देवीं समाश्वासयन् तिष्ठति देवः । तत्प्रतिपाल्योऽवसरः ।

पुरन्दरः— भवतु । पश्चात् सेविष्यावहे । उपरतप्रायो रिपुरिति मन्ये । यदि तावत् कृपालुः नान्तरा मोचयिष्यति तदा शक्यमस्माभिर्निर्भयैः सञ्चरितुम् ।

भृङ्गिरिटिः— आशुतोषो नः स्वामी । तस्मिन्नपराद्धोऽपि लघुनापि प्रियाचरणेन नैर्ऋतेन्द्रः न केवलं न नङ्क्ष्यति परं तु वरलाभेन वर्धिष्यते इति प्रत्येमि ।

पुरन्दरः— अहो अत्याहितम् ।

बृहस्पतिः— किं तल्लघु प्रियाचरणम् ।

भृङ्गिरिटिः— (स्वगतम्) हा धिक्, निर्भिन्नं मया रहस्यम् । (प्रकाशम्) यत्किञ्चित् घुणाक्षरन्यायेनासङ्कल्पोपहितं विरुद्धाचरणस्यापि संभाव्यते नाम ।

बृहस्पतिः— कुतः संभाव्यते ? स्फुटं भण यदि न रहस्यम् ।

भृङ्गिरिटिः — (स्वगतम्) अद्यैव रहस्यभेदी जनः शापमापः। सङ्कटे खलु पतितोऽस्मि । किमिदानीं करोमि । भवत्वेवं तावत् । (प्रकाशम्) आह भगवान् नन्दी भवन्तौ न चिरादभिभाषिष्ये इति । स एव जानाति कथमिति ।

पुरन्दरवाचस्पती — (परस्परं सशङ्कं पश्यतः)

(नेपथ्ये हाहारवः)

पुरन्दरः — (सोत्प्रासम्) मा तावत् स धूर्तः 'भक्तिपारवश्यात् सपीठं भगवन्तं सपार्षदं शिरोऽधिरोप्य नर्तितुं प्राक्रंसि । नान्यथा सम्भावनीयम्' इति श्लक्ष्णमुक्त्वा छलयिष्यति वरदानविशृङ्खलम् । जागर्तु पार्श्वे नन्दी ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वाचस्पतिः—(स्वगतम्) अहो विरसमुपन्यस्तं दुरभ्यस्तप्राभववासनाकरालितमतिना।

भृङ्गिरिटिः—(स्वगतम्) अहो प्रश्रयव्यपेतानि दुर्भाषितानि दुर्मेधसां वित्तेश्वराणाम्। (प्रकाशं सवैलक्ष्यम्) यथार्हं प्रतिबोध्यतां तावन्नन्दी।

वाचस्पतिः— को न्वसावद्रिशिखरे फीट्करोति।

पुरन्दरः— न तावत् स जाल्मः पुनः प्ररूढबलः —

भृङ्गिरिटिः— (दृष्ट्वा सहासम्) अहो प्रहसनम्।

प्रवेश्य शुण्डामुपलान्तराले
क्वचित्सचीत्कारगुरुप्रकम्पः।
तले तताङ्घ्रिः कृतकर्णतालः
फीट्कारमुन्मुञ्चति कुञ्जरास्यः॥ ९६॥

पुरन्दरवाचस्पती— (हसतः)

भृङ्गिरिटिः— पार्श्वगतं कुमारं विनोदयितुं भ्रातृवत्सलस्येदं क्रीडितम्। (स्मृत्वा) द्रष्टव्यौ मे वत्सौ।

पुरन्दरः— स्वनियोगमनुतिष्ठतु भवान्। आवामपि कुबेरं समाश्वास्य तमेव पुरस्कृत्य भगवद्दर्शनावसरं प्रतिपालयिष्यावः।

इति सर्वे निष्क्रान्ताः।

इति पञ्चमोऽङ्कः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अथ षष्ठोऽङ्कः ।

ततः प्रविशन्ति विषण्णा विद्युज्जिह्व-महोदर-प्रहस्ताः
कैलासमूले निषण्णाः ।

महोदरः— (सपरिदेवनम्)

विद्युज्जिह्व, विचेतनो निशिचराधीशः प्रहस्त, प्रभु-
र्हस्तैरद्रिनियन्त्रितैरशरणः शेतेऽत्र लङ्केश्वरः ।
हा मातामह, केकसीप्रियसुतं जानासि नैतादृशं
हा धिक् ! किं करवाम का गतिरहो भर्ता कथं मोक्ष्यते ॥ ९७॥

प्रहस्तः— हा धिक् ! एवं भो दिक्पतिविजयाशंसा पर्यणंसीत् ।

विद्युज्जिह्वः— पश्यतु भवान् परिभवम्—

वियति मिलिताः सद्यः स्वर्गौकसो धृतकौतुका
अयि निपतितः शत्रुर्दिष्ट्येति संप्रणदन्त्यमी ।
कितव सदृशं जातं भुङ्क्ष्वैनसः फलमित्यहो
विबुधसुहृदः सन्दष्टोष्ठा रुजन्ति निजाङ्गुलीः ॥ ९८ ॥

प्रहस्तः— कष्टं बत भोः, यदसमीक्ष्यकारिभिः दिक्पालकसाधारण्येनावज्ञातो महेश्वरः । न च स्मृतं सार्वभौमोऽयं सुरासुराणाम् ऋजुःप्रकृत्या दयालुश्च, विशेषतोऽस्मत्पितामहचरणानां वरप्रदायी, झटित्यस्माभिर्वैरिवस्योपहारपरितोषणीय इति ।

विद्युज्जिह्वः— विशीर्णमस्मन्मन्त्रबलं यत्सन्धेयानमिषेणयामो यातव्यांश्चोपेक्षामहे ।

महोदरः— नाकलोकं प्रस्थितान्नः सुरकार्यलम्पटः स कपटनाटकवटुः ज्ञातिधर्ममनुसृत्य अन्तर्हितदुरुदर्कैः आपातसमञ्जसैस्तर्कैश्छलयामास ।

प्रहस्तः— स एवास्माकमद्य दुर्निमित्तं जातः ।

विद्युज्जिह्वः—चतुरः स प्रतिबध्नन्निव निषिद्धे नः प्रवर्तयामास ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रहस्तः— एवं प्रवीणाः सूरहितैषिणः। अस्माकं तु शौर्यमेकं परायणम्। (श्रुत्वा) महोदर, स्वामिनः पार्श्ववर्ती भव। निःसहं हुङ्करोतीव वेदनया।

महोदरः— तथा (इति निष्क्रान्तः)

प्रहस्तः— विद्युज्जिह्व, सर्वमिदानीमाकुलीभूतम्— क्षेमं नः यदि स्वामी केवलमपोद्धृत्य बाहून् अव्ययितासुः परावर्तते लङ्काम्। पश्य,

यक्षाणामलका पुनः करगता नष्टं च नः पुष्पकं
कीर्तिः कश्मलिता भुजा विमथिताः प्राप्तोऽवमानः परः।
मोघाः सर्वमनोरथाश्चिरधृता दैत्याधिराज्याश्रया
अस्मिन् मत्कुणपेषमाशरपतौ पिष्टे हरस्याङ्घ्रिणा॥ ९९॥

विद्युज्जिह्वः— तत् कीदृगिदानीं हरप्रीणनमाचरितव्यम्?

प्रहस्तः— स्वामी खलु तत्र विज्ञाप्यः।

प्रविश्य

महोदरः— स्वामी व्रणज्वरेणोन्मादावस्थायामिव वर्तते।

तथा हि—

हा मन्नन्दन, मेघनाद, न रिपून् बध्वा तवोपाहरं
हा मन्दोदरि, मन्दभागिनि मुधा जीविष्यसि प्रेयसि।
ध्वस्ते मय्यमरप्रभापहमहादर्शत्रियामामह-
स्यंहो राक्षसपुङ्गवाः कनु लयं यूयं भिया प्राप्स्यथ॥ १००॥

इति प्रलपति। करुणं च विचेष्टते।

उद्वेल्लति त्रुटितपन्नगपुच्छतुल्यं
निःश्वासदीर्घमधरान् दशति प्रगाढम्।
उद्वृत्तविंशतिविलोचनपिङ्गलिम्ना
श्मश्रूणि रञ्जयति शश्वदिवोच्छिखानि॥ १०१॥

प्रहस्तः— विद्युज्जिह्व, पितरं मे समानय स जानात्यत्र प्रतिविधानम्।

विद्युज्जिह्वः— प्रागेव किल शुकः प्रेषितः ससहस्रकुलं मातामहमानयेति। कुतोऽद्यापि न दृश्यते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

महोदरः— सर्व एव मन्त्रो विपर्यस्तः। हा धिक्।

प्रहस्तः— विद्युज्जिह्व, कदाचिदलकापरिसरे अस्मानपश्यन् पर्यटति। तदन्विष्य वृत्तान्तमावेद्य इहानय।

विद्युज्जिह्वः— यद्यलकां प्राप्तस्तदा यक्षहर्यक्षाणां क्ष्वेडितकोलाहलेनैव ज्ञात्वा विपरीतम् उपरि वृत्तान्तकातरः परिभ्रमन् यदृच्छावशादिहाप्युपेयात्। तत्कुतोऽन्विष्यते।

प्रहस्तः— छिद्यतां ते आलस्यकथा।

महोदरः— (दृष्ट्वा) इतः सममिवर्तते सुहृद्गोष्ठी। पृष्ठतश्च ते पिता।

ततः प्रविशति

शुकसारणाभ्यां निर्दिश्यमानमार्गः मारीचेन सह सुमाली।

शुकसारणौ— अत्रामी लङ्केश्वरामात्याः।

मारीचः— किममी विविक्ते तिष्ठन्ति।

(प्रहस्तादयः शोकं नाटयन्तः उत्तिष्ठन्ति)

सुमाली—(परिक्रम्य दृष्ट्वा सामर्षम्) भोः किं शोचथ? भवद्भिर्हि मन्त्रिमहत्तरैरपथेऽपकृष्टो राजा। प्रहस्त, त्वमपि खलु मूढो जातः।

न ते ज्ञातं मात्रा गिरिशिरसि सन्ध्यातनयया
परित्यक्तं गर्भं द्युतिविजितसूर्यं प्ररुदितम्।
वृषारूढो गच्छन् वियति भगवान् सार्धमुमया
भवो दृष्ट्वा (सास्रम्) यन्नः पितुरयमकार्षीत्करुणया॥ १०२॥

तदा च,

व्याजीकृत्य सुकेशं सर्वेषामप्यकल्प्यत प्रभुणा।
सद्यो गर्भोत्पत्तिः प्रसूतिरपि नो वयःप्राप्तिः॥ १०३॥

अथान्येद्युः,

सुकेशतनयानां नो निग्रहाय सुरार्दिनाम्।
प्रार्थितो भगवानूचे यत्तु तद्विस्मृतं नु वः॥ १०४॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विद्युज्जिह्वः— कथं विस्मरिष्यामः।

सुकेशे सापेक्षः प्रभुरथ सुरानाह रुदतो
भवद्भिर्विद्राव्य प्रतिदिशमविश्रम्य मृदितान्।

करौ धून्वन् यात प्रचलत न वध्या मम वरै-
रमी वीर्योपेता मयि विहितभावा इति किल॥ १०५॥

प्रहस्तः— जानतामेव प्रमोहः कुतोऽपि जातः।

महोदरः—भर्तुः प्रकृतिसिद्धया विजिगीषुतया तिरोभूता विशेषसंस्काराः।

मारीचः— एवमतीते कार्यकाले मुधाऽस्माकं बुद्धिः प्रसीदति।

सुमाली— मारीच, अस्ति मे प्रत्ययः इदानीमपि, यत्—

सुकेशतनयस्यैनं दौहित्रं सान्त्वितः प्रभुः।
महादेवोऽचिरादव्यादव्ययः करुणाम्बुधिः॥ १०६॥

महोदरः—बाढम्। अस्मासु सापेक्षतयैव कैलासनाथः अपराधकर्तुः बाहुमात्रं निपीड्य तं सावशेषजीवितं करोति।

सुमाली— जगत्पितुः कुतः कोपः सापराधेषु जन्तुषु।
यथोचितं शिक्षणं तु प्रकृष्टोदर्कहेतवे॥ १०७॥

तद्दर्शयत मे मार्गं वत्सदर्शनाय। समाश्वास्य वत्सं क्षिप्रमेव तस्मै हितमुपदिशामि।

(सर्वे चलन्ति)

विद्युज्जिह्वः— कथं सारणमारीचौ मातामहेन सङ्गतौ? कीदृशीदानीमलका?

सुमाली— महादेवसखः कुबेर इति, कैलासपरिसर इति च विचिन्त्य शुकसमागमक्षण एव युष्मद्विचेष्टितेषु जाताशङ्कः प्रास्थिषि कैलासं प्रति। अस्मिन्नेवान्तरे प्रत्यागतानां यक्षाणां कोलाहलेन विदितस्वामिभङ्गौ निर्गतौ सारणमारीचौ प्रत्यासीदन्तं मामिदमित्थमिति बोधयामासतुः। सर्वथा दुष्करमाचरितम्। (सहसा दृष्ट्वा) अये वत्सः। (सविषादम्) हन्त भोः कारुण्यम्—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विशीर्णमुकुटावलिर्विगलितालकस्साश्रुभि-
र्मुखैर्दशभिरुद्वमन् श्वसितमुग्रमायासभाक्।
भुजैः प्रणिहितैरधो गिरिवरस्य धिक्सङ्कटे
तटे लुठति केवले महिमशालिनामग्रणीः॥ १०८॥

कम्पते मे हृदयम्। ध्वंसते धृतिः। भ्रमति दृष्टिः। मुह्यति चेतना। अवसीदन्ति गात्राणि। जिह्वा च परिशुष्यति। कथमीदृशं वत्सं प्रेक्षे। हा वत्स, ...

इति रुदन् सत्वरं परिक्रम्य सर्वैः सह निष्क्रान्तः।

इति षष्ठोऽङ्कः।

अथ सप्तमोऽङ्कः।

ततः प्रविशति नारदः

नारदः— (कैलासं, दूरादवलोक्य सप्रणामम्)

नमस्ते कैलास, क्षितिधरशिरोरत्न, तुहिन-
प्रभालेपैः सत्वोन्नतिमतितरां यो दधदिव।
अधस्तान्मुक्तानां घनगहनधाम्नामुपरि यं
स्फुरन्तं प्रस्थानामधिवसति साक्षात्पशुपतिः॥ १०९॥

(विचिन्त्य सानन्दम्) अहो लीलामात्रं भगवतः परिपन्थिनिग्रहोद्योगः। तदेतत् पारमैश्वर्यं नाम।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दृशैवारादीषद्विवृतपुटया काममदह-
त्पुराकारान् घोरान् हसितसितभासैव दनुजान्।
विषं कण्ठे धृत्वा मणिमिव ररक्ष त्रिभुवनं
नतेनाङ्गुष्ठेन ग्लपयति च लङ्केशमधुना॥ ११०॥

(विमृश्य) परं तु पुनरुन्मीलन्तीमिव पश्यामि भाग्यपङ्क्तिं पङ्क्तिवदनस्य। यन्न केवलं प्रशान्तकोपः परमेश्वरः मनाक् प्रसादाभिमुखोऽपि वर्तत इति प्रत्येमि।

तथा हि—

कैलासाद्रेस्तोलनं तावदास्तां
तेनैवास्मिन् दृष्टवीर्ये प्रतुष्येत्।
त्रस्ता देवी मानमुत्सृज्य कण्ठं
जग्राहेति स्थाणुरन्तः समोदः॥ १११॥

दृष्टो ह्येष मया नभस्स्थेन व्यतिकरः—

शैले डोलायमाने सपदि शरवणे सञ्चरन्ती सखीभिः
सातङ्का हा किमेतच्चलति गिरिरसावित्युदीर्योत्पतन्ती।
नाथ, त्रायस्व वत्सौ न किमिह भगवन् चक्षुरुन्मील्यपश्ये-
त्यारादाश्लिष्य कण्ठं सरभसमविशत्पार्वती पत्युरङ्कम्॥ ११२॥

प्रभुरपि परिहृत्य योगनिष्ठा-
मलमतिभीरुतयेति तां प्रतीष्य।
गिरिवरमदवारणस्य सद्यः
पदनलिनाञ्चलमङ्कुशीचकार॥ ११३॥

एवं च,

देव्या मानविधूननं पशुपतेर्निध्यानविक्षेपणं
देवीदेवविभेदकातरगणप्रह्लादसन्धुक्षणम्।
सद्यो निर्जितगुह्यकेश्वरपुरीदौर्गत्यविद्रावणं
जातं भूरिगुणं किलाद्रिचलनं लङ्केश्वरप्रेरितम्॥ ११४॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स च, भुजबलवैयर्थ्येन व्यपनीतदर्पः सद्यः सुमालिप्रतोदेन चात्मोन्मोचनविधिमनुचिन्तयन् स्वस्य च शाम्भववंशाभिजनतया झटिति कन्दलितभक्तिपरिस्पन्दः नचिरात् परितोषयिष्यत्याशुतोषमिति तर्कयामि। तथा च, साम्प्रतं प्रतिबद्धाः स्थास्यन्ति सुरमुख्यानां रक्षःपतिसमूलक्षयप्रत्याशाः। (श्रुतिमभिनीय) उपक्रान्तं खलु शिवाराधनं स्तुतिगीतामृतवर्षेण। अहो राक्षसराजस्यागाधमाधुर्यहृदायमानं कण्ठगाम्भीर्यम्। येन निर्ह्रादिन्यो वाद्यदशामापद्यन्ते दशापि दिशः। आपूर्यते च शैलव्योमान्तरं सिद्धचारणयक्षकिन्नरशिवपार्षदाद्यैः विमानविलम्बिभिरमरगणैरपि। यतः,

विस्मारयति विरोधं व्यपनयति शुचं विनोदयत्यार्तिम्।
रहयत्यवलेपभरं सङ्गीतकमनुष्ठितं कुशलैः॥ ११५॥

फुरुफुरायन्ते मेऽङ्गुलयः गीतानुसारेण वल्लकीं वादयितुम्॥
(इति वीणया अनुगायति)

नेपथ्ये रावणगीतम्

हर शम्भो, हर शम्भो,
शिव, शिव, करुणावारिनिधे ...

1 पौलस्त्यं मां पालय दुष्टं
कैलासाचलमूलनिघृष्टम्।
हर शम्भो, हर शम्भो,
शिव, शिव, करुणावारिनिधे॥ हर ...

2 त्रिपुरविजयिनं दारदपायिनं
दग्धमनोभवं दान्तकृतान्तम्।
दर्पवशादहो त्वामवमतवतो
मर्षय मर्षय कृतमपराधम्॥ हर ....

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

3 मातृसनाथं वत्सलहृदयं
जन्तुषु सदयं मन्तुयुतेष्वपि।
द्रोहपरायणो दुर्हृदयोऽहं
प्राणपरीप्सया त्राणमुपार्थये॥ हर ...

4 प्रणतसुरगणदानवमानव-
खगनगमृगकुलराक्षसपालन।
पाहि मां शम्भो, पापकृदुत्तमं
शरणं तव चरणम्॥ हर ...

5 वेदगुहाशयध्वनितगभीर-
व्याहृतिभावितनिर्भरमहिमन्।
विश्वविपिनपुराणपञ्चानन,
त्वय्यपि विक्रमदम्भमतानिषम्॥ हर ...

6 विष्णुविधातृमहेन्द्रमुखसुर-
प्रार्थितनेत्रत्रिभागनिरीक्षण।
त्वं जगत्त्रयगुरुः सर्वमिदं तव
प्राणिकुलं विभो जातमपत्यम्॥ हर ...

7 त्वदभयमव्ययं मार्गति दासोऽयं
साधु बुभूषतो दर्शय मार्गम्।
मदनान्तक, सुमालिबन्धोर्मे
श्रीशङ्कर॥ हर शम्भो ...

नारदः— अहो श्रोत्रपेयता रागामृतपरीवाहस्य। अहो मनःसंवननं साहित्यसौष्ठवम्। एवं प्रीणितपरमेश्वरो नूनं क्षेममवाप्स्यति पापिष्ठोऽपि। भवतु पश्यामीति।

(अन्तर्धाय स्थितः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ततः प्रविशन्ति कैलासनाथसन्निधौ ध्यानेन परमेश्वरं साक्षात्कुर्वन्तः पुष्पदन्तोपमन्युमार्कण्डेयदुर्वासश्चण्डिकेशप्रभृतयः शिवपार्षदाः।

पुष्पदन्तः—

प्रभो पादाङ्गुष्ठं द्रढयति निवासाचलमधो
निरुद्धः पापात्मा दशमुखमहाखुः क्षममिदम्।
परं गौरीनाथ त्रिनयन महेश क्षितिरियं
निमग्ना शेषाहे रवरुजति कण्ठं कुरु दयाम् ॥ ११६ ॥

उपमन्युः— भगवन्, भवानीपते,

निविष्टः कैलासः प्रतिहतभुजाविंशतिरसौ
दशास्यो दीनास्यः शरणमिति सास्रः प्रलपति।
धनाध्यक्षा यक्षा निजनगरभाजः प्रमुदिताः
किमङ्गुष्ठस्यैवं चिरविनमनक्लेशमयसे ॥ ११७ ॥

मार्कण्डेयः— स्वामिन्नन्तकान्तक,

नता यस्मै देवा मधुरिपुमहेन्द्रप्रभृतयो
यमुद्वाट्याशास्ते श्रुतिरपि नृणां मुक्तिपदवीम्।
व्युदास्थन् मह्यं यो यममभयदः सर्वजगतां
कुतः कस्मै सोऽयं नमयति शिरस्तेऽपि चरणः ॥ ११८ ॥

दुर्वासाः— अहो तु खलु भोः, कैलासपते,

क्वचित्ते पादाब्जं शमनदमनायोद्धतमभू-
न्मुहुर्जानीमोऽदस्त्वयि नटति निर्धूतमुपरि।
न लेभे भूदारः स च मृगयमाणः क्वचिदिदं
धृतं तत्पश्यामो दशमुखमहेभाङ्कुशतया ॥ ११९ ॥

चण्डीशः—

जगद्भर्तुर्मित्रं रिपुरिति मृषा जन्तुमबुधं
द्विषन्तं शिक्षित्वा स्वहितममुमीशो गमयति।
तथा चासौ नम्रः प्रणतिमुपदेष्टुं करुणया
पटिष्ठो ह्यङ्गुष्ठः कुटिलमतिशिक्षावनविधेः ॥ १२० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इतरे—

एवं द्रुतमना गायन् सापराधोऽपि शङ्करम् ।
अङ्गुष्ठयन्त्रणान्मुक्तिं लभतां राक्षसेश्वरः ॥ १२१ ॥

आकाशे

'अयि भोः पार्षदपुरोगाः, अद्य विरतव्यापारो भवत्यङ्गुष्ठः । स च सुकेशवंश्यः प्रणयार्हो मम यथावदक्षतवर्ष्मा निघृष्ट इव मणिरधिकोज्ज्वलो भुजबलेन मयाऽनुगृहीतो निवर्तिष्यते ।'

सर्वे— सर्वेश्वरस्य स्थाने खलु प्राणिसामान्ये वात्सल्यम् ।

(इति निष्क्रान्ताः)

नारदः— (आविर्भूय) यथोत्प्रेक्षितमापतितम् । न केवलं मोचयिष्यते, अनुग्रहीष्यतेऽपि नाम । भवतु मघवन्तं बोधयामि क्षिप्रं प्रतीतः स खलु मुग्धो निश्शङ्कमास्ते ।

(इति निष्क्रान्तः)

शुद्धविष्कम्भः ।

ततः प्रविशन्ति साद्भुतहर्षाः लङ्केश्वरप्रभृतयो राक्षसाः ।

सुमालिप्रभृतयः—

जय पशुपते जीयासुस्ते शिवाङ्घ्रिनिषेविण-
स्त्रिपुरविजयिन् स्फायन्तां ते चरित्रविभूतयः ।
भव मृड महादेवेशान प्रभो हर धूर्जटे
प्रथय करुणांप्राणिष्वागस्करेषु वृषध्वज ॥ १२२ ॥

राक्षसमन्त्रिणः —

जय विजयीभव लङ्केश्वरपौलस्त्यान्ववायविधो ।
विधुशेखरशिखरिशिरःकम्पश्लाघासमेतशौर्यनिधे ॥ १२३ ॥

दशाननः—

भुजाटव्यामस्यां शिखरिमथितायां पशुपते
दया ते जीवातुस्सकृदमृतवृष्टिः परिणता ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यथा मन्ये त्र्युट्यत्सिरमपहृतास्थि क्षरदसृक्-
प्रवाहं तन्निष्पीडनमपि मृदूद्वर्तनमिव ॥ १२४ ॥

समरजयिनां संख्ये गात्रेष्वनीषदिषुव्रण-
प्रसृतरुधिरालिप्तिः सौभाग्यचन्दनचर्चिका।
परमिह स च क्लेशः स्वप्नावभासवदत्यगा-
द्गिरिविचलने शौर्यं शिष्टं तवापि विभो कृपा ॥ १२५ ॥

मौर्ख्यादेवेदृशमकरवं देव सेवामिवैतं
मन्तुं मन्तुं तव समुचितं वत्सलत्वात्प्रपन्ने।
नैतत्पीठीविघटनमरेरस्तु डोलोत्सवस्ते
भक्त्याऽऽरब्धः किल गिरिजया दीव्यतो मत्कराग्रैः ॥ १२६ ॥

मन्नाथ नित्यमिदमस्तु तव स्तुतीना-
मध्येतृ वक्त्रदशकं दशकन्धरस्य।
स्याल्लक्ष्म लोकविदितं भवदङ्घ्रिपीठ-
साधैक्षणावधिसमुद्वहनं च दोष्णाम् ॥ १२७ ॥

सन्त्यद्रिशृङ्गसमतुङ्गदशा दशैते
मन्मस्तका मणिकिरीटरुचा मनोज्ञाः।
प्रालेयकूटमपहाय सहाम्बयैव
क्षिप्रं प्रभो त्वमभिरोचय वासमेषु ॥ १२८ ॥

अर्धेन्दुनाऽञ्चितशिखामणिरभ्रधुन्या
या स्रग्विणी फणिगणेन च भूषणाढ्या।
अक्ष्णोपलक्ष्यतिलका भसिताङ्गरागा
मूर्तिर्मुदे मम पुरो द्रुतमाविरस्तु ॥ १२९ ॥

कैलासशिखरे सनन्दिकेश्वरस्य परमेश्वरस्य आविर्भावः।

सर्वे— (साश्चर्यहर्षाः) जय जय महादेव।

(इति प्रणमन्ति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दशाननः—

नमस्ते रुद्रायाश्रितविहितभद्राय च नमो
नमस्ते शर्वाय क्षपितरिपुगर्वाय च नमः ।
नमस्ते सोमाय ज्वलनहुतकामाय च नमो
नमस्ते भर्गाय प्रणतसुरवर्गाय च नमः ॥ १३० ॥

कपाले खं वह्निं दृशि सुरतटिन्यां च सलिलं
भुवं भस्मन्यङ्गेष्वहिषु पवनं चन्द्रमलके ।
निजालोके भानुं निजमहसि कल्पक्रतुकृतं
त्वमष्टौ मूर्तीर्मे शिवविवृणुषे स्वात्मनि पुरः ॥ १३१ ॥

यदेवाप्तश्रुत्या तदनु यदधीतेन बहुना
यदन्तः संरुद्धे मनसि सकृदारादधिगतम् ।
ज्वलत्फालं नीलद्युतिगलमरालेन्दुमुकुटं
झरोत्तंसं भ्रश्यत्फणि मम पुरः प्रेङ्खति महः ॥ १३२ ॥

गिरिशमजकपालग्राहिणं व्यालचर्मा-
म्बरपरिहितमेणं पाणिना संदधानम् ।
प्रतिभयनिजकण्ठक्ष्वेडमङ्गारनेत्रं
वृषपतिकृतझम्पं पञ्चवक्त्रं नमामि ॥ १३३ ॥

परमेश्वरः—

प्रीतोऽस्मि तव शौण्डीर्याद्भक्त्या च दशकन्धर ।
शैलाक्रान्तेन यन्मुक्तस्त्वया रावः सुदारुणः ॥ १३४ ॥

तस्मात्त्वं रावणो नाम्ना लोके ख्यातो भविष्यसि ।
गच्छ पौलस्त्य विस्रब्धं पथा येन त्वमिच्छसि ॥ १३५ ।

रावणः—

प्रीतो यदि महादेव देहि मे शस्त्रमुत्तमम् ।
येन स्यां सर्वविजयी त्वत्प्रसादस्य लक्ष्मणा ॥ १३६ ॥

परमेश्वरः—

अयं खड्गो महादीप्तश्चन्द्रहास इति श्रुतः ।
पूजयैतमवज्ञातो ह्यसौ मां पुनरेष्यति ॥ १३७ ॥

(इति प्रतिपादयति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रावणः— (गृहीत्वा)

अन्यच्च भगवन् यक्षरक्षःसमरनिर्जितम्।
भवत्प्रभावाद्विष्टब्धं वाह्यं स्यान्मम पुष्पकम्॥ १३८॥

परमेश्वरः— भवतु।

आकाशे

मा भूत्।

सर्वे— (विस्मयन्ते)

नन्दी— हा कः प्रतिषेधति महेश्वरम्।

परमेश्वरः— (सस्मितं) विजये त्वमत्र व्यापृता ननु? मुञ्चैतद्विमानम्।

आकाशे

भगवन्, शरवणगतां देवीं स्मृत्वा राक्षसाभिभवशङ्कया कैलसपथे निरुद्धं मया पुष्पकम्।

नन्दी— एवं न्वेतत्?

परमेश्वरः—सेविता देवी तुभ्यं प्रतुष्यति। त्वं च मच्छापान्मोचयिष्यसे यदा त्वद्दयिताय मत्तः उपश्रुताः कथाः वर्णयिष्यसि। मुञ्चेदानीं पुष्पकम्।

अकाशे

अनुगृहीतास्मि। एषा विमोचितवती विमानम्।

परमेश्वरः— रावण, किं ते भूयः प्रियमुपहरामि।

रावणः— किमन्यन्मे प्रियमस्ति।

यत्कैलासमतोलयं यदरुदं सर्वा दिशो नादयन्
यद्भ्रमैरपि च व्यषीदमगतिः शौर्याकरैर्बाहुभिः।
सर्वं नाथ ममास्त सार्थकमिदं यस्मात्प्रसन्नो भवान्
दुर्वृत्तेऽपि मयि प्रकाश्य करुणामव्याजसान्द्रोदयाम्॥ १२९॥

तवास्मि भगवन् भक्तो लोकानामस्मि रावणः।
सचन्द्रहासः शत्रूणां राजा पुष्पकवाहनः॥ १४०॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तथापीदमस्तु भरतवाक्यम् ।

धर्मव्याजमपोह्य शम्भुशरणाः श्रद्धाविनीत्यन्विताः
श्रेयोवर्त्मनि सङ्गता बहुविधं प्रेयोऽर्जयन्तु प्रजाः ।
अप्युग्रैरभियोगडम्बरभरैः प्रेयांसि ये प्रेप्सवो
व्याघातं समवाप्य ते शरणयन्त्वार्ताः शरण्यं शिवम् ॥ १४१ ॥

इति निष्क्रान्ताः सर्वे ।

सप्तमोऽङ्कः ।

इति श्रीमद्भरद्वाजकुलतिलक श्रीमदप्पय्यदीक्षितेन्द्रवंशमुक्ताफलानां महामहोपाध्याय - राजुशास्त्र्याख्याविख्यात - श्रीत्यागराज-मखिराजानां प्रपौत्रेण, महामहोपाध्यायशास्त्ररत्नाकरादि-बिरुदाञ्चित श्री यज्ञस्वामिशास्त्रिवर्याणामात्मजेन

श्रीमहालिङ्गकविना

विरचितमिदम्

उद्गातृदशाननाख्यं नाटकं सम्पूर्णम् ।

श्री साम्बपरमेश्वरप्रीतिरस्तु ।

मङ्गलानि भवन्तु ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उद्गातृदशानने वृत्तानां सूची ।

अनुष्टुप्	1, 4, 8, 11, 14, 27, 28, 36, 46, 47, 51, 54, 58c 77, 79, 80, 81, 83, 84, 92, 94, 104, 106, 107, 121, 134–138, 140
आर्या	3, 6, 7, 21, 58a, 86, 103, 115
उपगीतिः	26, 43
गीतिः	16, 58, 58b, 70, 78 a
उद्गीतिः	69, 123
पादकुलकम् (चित्रिणी)	55, 66
इन्द्रवज्रा	5, 12
उपजातिः	71, 91, 96
शालिनी	2, 18, 111
रथोद्धता	63
वियोगिनी	61
पुष्पिताग्रा	49, 57, 64, 113
प्रहर्षिणी	78
वसन्ततिलक	10, 20, 22, 24, 32, 44, 60, 72, 73, 89, 101 127, 128, 129
मालिनी	34, 65, 74, 133
शिखरिणी	13, 33, 53, 67, 68, 90, 93, 102, 105, 109, 110, 116—120, 124, 130–132
हरिणी	98, 122, 125
पृथ्वी	52, 62, 75, 85, 87, 108
मन्दाक्रान्ता	17, 19, 95, 126
शार्दूलविक्रीडितम्	9, 15, 23, 31, 37–42, 58d 59, 76, 82, 88, 97, 99, 100, 114, 139, 141
स्रग्धरा	35, 112
नूतनतया कल्पितानि वृत्तानि	25, (29) 30, 45, 48, 50, 56

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

A NOTE ON THE NEW METRES

—— :o: ——

संख्या	श्लोकसंख्या	वृत्तम्	गणाः	यतिः	मात्राः अक्षराणि
1	25 29	जयार्या (मात्रावृत्तम्)			12/10 12/10
2	30	शार्दूलविक्रान्तम् गणवृत्तम् A combination of शार्दूल-विक्रीडित & स्रग्धरा			19/21 19/21
3	45	पृथ्वीमालिनी	ज, स, य, य, य	8+7	15
4	48	शार्दूलललित	म, स, न, म, य, ल, गु	6+4+7	17
5	50	पृथ्वीधरा	ज, स, ज, भ, ज, गु	8+8	16
6	56	विशालिनी	म, य, र, र, गु	6+7	13
7	56a	तुङ्गप्रेङ्खितम्	म, य, य, ल, गु	5+6	11

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ERRATA

Page	Line from top	Line from bottom	For	Read
2		5	आर्यपुत्र	आर्यपुत्त
3	2		तदिद	तदिम
4	3		कलास	कैलास
	7		मूकादिशः	मूका दिशः
	13		मतर	मवतर
	21		श्रूययां	श्रूयतां
6	17		श्रुणु	शृणु
	18		वैमातुरः	वैमात्रः
	24		वारोद्ध	वरोद्ध
7		2	निकुरुम्बः	निकरः
		1	नेत्रदर्शम्	प्रतिनेत्रम्
8	3		प्रवृतो	प्रवृत्तो
		5	देवीदेवयोर	देव्या देवस्य चा
		,,	अन्तरः संवृत्तः	अन्तरं संवृत्तम्
		3	च्छि	श्छि
9	11		न्यार्षा वि	न्यार्षीर्वि
11	10		सांसारिकाः	सांसारिक्यः
	15		भाविनमेव	भावि यदेव
17	8		साम्प्रता	साम्प्रतम्
20	3		चहुत्वा	च हुत्वा
	9		सय क्ष	स यक्ष
21	4		धिजिता	विजिता
	7		नोत्तम	नोत्तमं
	13		कयं	कथं
23	8		वार्षिका	हायना
	15		अहु	अहो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

24		6	प्यन्घी	प्यन्धी
		1	गतासि	गतासि ।
25	17		स भच	सभय
26	21		स्थाः	स्याः
27	3		मघुरं	मधुरं
	5		शरिका	शारिका
	22		धिक	धिक्
	,,		दृष्टि	दृष्टि
30	19		धिष्टितं	धिष्ठितं
33	5		Verse not numbered	५८ *a*
	8		,,	५८ *b*
	11		,,	५८ *c*
	14		प्रत्यवपत्स्यसे	प्रत्यवपत्स्ये
	17		वुद्धय	वुद्धय
34	10		मियुञ्जेरन्	मियुञ्जीरन्
	21		चिताऽय	चितोऽय
36		4	Verse not numbered	५८ *d*
37	13		कल्पान्तर	कन्पान्त
38	7		शिस्यर	शिखरा
	22		वेष्टिते	वेष्टिते
39		3	स्रुतय	स्रुतय
40	7		प्रतीची	प्रतीच्यं
		4	प तन्ताऽपि	पतन्तोऽपि
41	6		परिष्ठात्	परिष्टात्
42	18		कण्डुल	कण्डूल
	22		किमुत्त	किमुत
44	18		लोड्य	लोडय
45		8	Verse not numbered	७८ *a*
		,,	पातात् गण्डो	पाताद्गण्डो
47	4		क्ष्वेडु	क्ष्वेडु

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

47	12		रोघपा	रोधः पा
48	5		भेत्त	भेत्तु
53	14		जाङ्गलीः	जाङ्गुलीः
54		7	त्रटित	त्रुटित
55		1	भगबा	भगवा
59		1	सङ्गीतकम	सङ्गीतम
60	16		प्राणिकूलं	प्राणिकुलं
61	19		योद्धत	योद्धृत
64	13		भ्रश्यफणि	भ्रश्यत्फणि
65		3	१२९	१३९

29	9	चूषित्तं	चूषितं
,,	10	Verse not numbered	५६a

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उद्गातृदशानने

॥ श्लोकानुक्रमणी ॥

	पुटसङ्ख्या		पुटसङ्ख्या
अग्रे घनीभव	41	एवं द्रुतमना	62
अङ्गुलिखनित्र	48	कपाले खं	64
अद्रेश्चूर्णनन	20	कः प्रक्षीणं	9
अधरोत्तर	49	कलक्वणित	39
अन्यच्च भगवन्	65	कलभा इव	40
अयं खड्गो	64	कलिश्चेदादि	3
अयं भगवतः शैले	44	कामलीला	27
अयि मदन	26	कारुण्येन च	50
अर्धेन्दुनाञ्चित	63	कुसुमायुध	38
अर्णवोऽर्णव	1	केकस्याः संप्रदाना	16
अलमलमसया	28	केचित्पार्षद	48
असङ्कीर्णाकारं	40	कैलासद्रेस्तोलनं	58
अस्यापि नन्दिनः	46	क्रीडन्ति नन्दन	11
अहमत्र हेतु	30	क्वचित्ते पादाब्जं	61
आलिप्तभस्म	41	क्षणं चित्तिप्रायः	40
इतः क्षीणामोदं	15	गिरिशमज	64
इन्द्रः स्यां	24	घोराट्टहास	6
ईर्ष्याकलुषं	33	घण्डांशोर्दहतो	12
ईर्ष्यावृश्चिक	33	चुलकितशत	30
उच्चैः स्तुतिः	38	जगत्पितुः कुतः	56
उत्तरलाक्षि	2	जय जय कुबेर	12, 13
उत्पत्य चोत्पत्य	40	जयति भगवान्	45
उद्वेल्लति त्रुटित	54	जयतु जयतु	16
एकान्ते न रमे	26	जय पशुपते	62
एता नन्दीश्वर	46	जय विजयीभव	62
एभिर्हि पातकि	25	तटित्प्रख्या तन्वी	28

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तन्त्रीयोगं 10
तरुतलविवरै 39
तवास्मि भगवन् 65
तस्मात्त्वं रावणो 64
तारामौक्तिक 3
तुहिनपटल 39
तेजोभङ्गमवा 47
त्रैलोक्योद्भट 47
दशदशन 11
दशभ्यो वक्त्रेभ्यः 49
दिक्कोणान् 45
दिष्ट्येति संश्लिष्य 49
दूरमुत्पतति 39
दृशैवारादीष 58
देव्या मान 58
देव्या सखीप्रणय 4
धत्ते दारित 9
धर्मव्याज 66
नता यस्मै देवा 61
न ते ज्ञातं 55
नन्दिकरकलित 1
नमस्ते कैलास 57
नमस्ते रुद्राया 64
नमो दिक्पाल 1
नितम्बैरम्बरा 26
निरवधिगगना 39
निर्झरशीकर 40
निर्दिष्टं जनकेन 18
निविष्टः कैलासः 61
निष्पन्दास्तरवः 4
निःशेषं क्षिप 21
पात्रमद्यतनं 12
पादाङ्गुष्ठं नमयति 50
पुनर्लब्धस्वास्थ्याः 49
पुरस्तान्नश्यन्तः 8
प्रकाशिनि विधौ 26
प्रभुरपि परि 58
प्रभोपादाङ्गुष्ठे 61
प्रवेश्य शुण्डां 52
प्रावारकं समुप 15
प्रीतो यदि 64
प्रीतोऽस्मि तव 64
बहिराविध्य 8
बाहुबलमस्ति 33
भुजाटव्यामस्यां 62
मध्ये तुलां 12
मन्दारद्रुम 14
मन्नाथनित्य 63
मरालरणितै 27
मारीचानय 21
मुख्याध्यक्ष 37
मूलं निषिञ्चन्ति 7
मौर्ख्यादेवेदृश 63
यक्षाणामलका 54
यक्षी राक्षसी 28
यक्षो रक्षो 1
यत्कैलास 65
यथावन्नामि 13
यदेवाप्तश्रुत्या 64
यन्मायामय 13
योषिन्नाम 26
रूप्यप्राये 10
लीनान् विभास 11
लुठन्ति गणशो 48
वत्सरा नाडिका 46
वासो व्याघ्रि 23

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचित्य गिरि 42
विद्युज्जिह्व 53
विंशतिकुण्डल 12
वियति मिलिता 53
विलीयसे कथं 28
विलुठ्य पुन 47
विशीर्णमुकुटा 57
वृष्टिर्वज्रधर 23
विस्मारयति 59
व्यस्तैर्वनस्पति 48
व्याजीकृत्य 55
व्यालम्बमान 2
शिष्टान् हंसि 44
शैले डोलाय 58
शृङ्गैरन्यैरपि 9
स नन्दनलता 47
सन्त्यद्रिशृङ्ग 63
समरजयिना 63
सुकेशतनयस्यैनं 56
सुकेशतनयानां 55
सुकेशे सापेक्षः 56
स्तिमितवितत 41
स्वयं समर 17
हर शम्भो 59, 60
ह हा धिगबला 27
हा मन्नन्दन 54
हासो यस्य 36

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

SAHITYA CANDRASALA

List of Publications, October, 1958.

Prose:

For Sanskrit Pupils in High Schools:

	Rs. as. ps.
LAGHURAMA CARITAM 1927, 1931 (no stock)	
UPAKRAMA PATHAVALI 1937	0—10—0
MADHYAMA PATHAVALI 1938, 1947	0—12—0
PRAUDHA PATHAVALI 1938, 1945	0—12—0
PRAVESAPATHAVALI 1947	0—10—0
SAMBHU CARYOPADESA 1931 (Foreword by Diwan Bahadur K. S. Ramaswami Sastri)	0— 4—0

For College Students:

BHASAKATHASARA
Complete in one Volume 1939 (out of stock)

BHASAKATHASARA with a Foreword by Professor A. B. Keith	Part I 1955	0—12—0
	Part II 1936	0— 8—0
	Part III 1955	1— 4—0
Translation to	Part I (out of stock)	
,,	Part III	0— 8—0

These parts have been prescribed texts in the South Indian Universities of Madras, Mysore, Andhra, Annamalai and Travancore and have been several times reprinted.

Poems:

KINKINIMALA 1934 (A collection of fifty shorter Lyrics including several songs and poems and translations from English Literature) 2—0—0

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

DRAVIDARYA SUBHASHITA SAPTATI 1952
(Foreword by Justice N. Chandrasekhara Iyer, Supreme Court) 1— 0—0

VYAJOKTIRATNAVALI 1953
(with English Translation and Introduction) 2— 0—0

DESIKENDRA STAVANJALI 1954
(with a Foreword by K. Balasubramanya Iyer) 0— 8—0

BHRAMARASANDESA 1954
(Foreword by N. Raghunatha Iyer, Assistant Editor, The Hindu, Madras) 1— 8—0

VANALATA 1955 (A Lyric Poem in 5 Cantos, with a Foreword by Professor M.R. Rajagopala Iyengar) 1—8—0

Dramas:

KAUNDINYAPRAHASANAM 1930 (a Comic Play with notes) 0— 8—0

KALIPRADURBHAVAM 1956 (in 7 Acts with a Preface by Justice T. L. Venkatarama Iyer, Supreme Court) 1— 0—0

SRINGARANARADIYAM 1956 (with Preface by Dr. V. Raghavan) 2— 0—0

PRATIRAJASUYAM 1957 (with a Foreword by K. Balasubrahmanya Aiyer) 6— 0—0

Apply to:

SAHITYA CANDRASALA,
Tiruvalangadu, B. O.,
(Via) Narasingampet,
Tanjore Dt. (Madras State.)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha